MSS No. 133 Subject Philosophy

Name of MSS तर्क संग्रह दीपिका

Author नीलकण्ठ भट्ट

Period – – Folios 78 (017 to 094)

Script Sanskrit Source Prithipal Singh

Missing Folios 001 to 016

एकस्मिन्शरीरेऽणुरूपस्यमन ... चित्ताऽवयवाः कपालिकारूपायेषां ...

रहित

अभावप्रसारणांऽगीकारादिति चेन्न तथा सति कायव्यूहस्थले सर्वादिमा... तस्य
ऽनुपपत्तेरितिदिक् मनःसंयोगाद्यंऽति व्याप्तिवारकेंद्रियत्वघटित... लोके
वर्णांऽपेक्षया लघुलक्षणमाह स्पर्शरहितत्वे सतीति एकैकं मनः ... लिसर्वा
त्मनामेकस्य मनसः स्वीकारे एकस्य ज्ञानदशायामपरस्य तदनुपपत्तिस्त
स्याऽणुत्वेन सकलेंद्रियैरेकदा संयोगाभावादिति भावः विभ्विति तथा च त
स्य परममहत्त्वपरिमाणवत्त्वेन पूर्वोक्तदोषानवकाशः अभावादिति विभु
द्वयसंयोगानभ्युपगमादिति भावः ज्ञानानुत्पत्तीति भावकार्यस्याऽसमा
वायिकारणाजन्यत्वनियमादिति भावः विभुद्वयसंयोगस्त्विति तस्य नित्यत्वे गौ

विभौ क्रियाभावादिति भावः २८

प्र० सं०
ह्री० १८

नोक्तनियमभंगः१=

त्वेनाऽसमवायिकारणक्रियाद्यऽसत्वेपिन हेतुरितिभावः मात्रपदमिति यद्य^ रूपस्याऽऽत्मादिनापि ग्राह्यत्वादितिभावः२=
पि चक्षुर्मात्रग्राह्यं(त्वे) चक्षुरितराऽग्राह्यत्वे सति चक्षुर्ग्राह्यत्वं तच्च रूपे न सम्भवति न
यापि त्वगिंद्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वं तद्विति ध्येयं गुणपदमिति नचैव
प्रमात्वमादायप्रमायामति व्याप्तिवारणायगुणविभा जकेति १।३=
मपि समाभिन्नसंयोगेऽतिव्याप्तिरिति वाच्यं त्वगग्राह्यचक्षुर्ग्राह्यगुणविभा^
जकधर्मवत्वपर्यवसानेनाऽदोषात् अतएव न परमाणुरूपादावव्याप्तिरिति
वोध्यं समुदायएवेति एवकारेणातिरिक्तचित्ररूपव्यवच्छेदः व्याप्यवृत्तित्वे
ति दैशिकव्याप्यवृत्तित्वेत्यर्थः इदमुपलक्षणं एकैकचित्ररूपस्थले
रूपाणामेकैकतत्प्रागभावादिस्थले चानेकप्रागभावादीनांकल

विषयतासंबंधेनेति शेषः २=

चित्राऽवयवाः कपालिकारूपा येषां तानि इति समासः तथा च चित्रकपालिकारब्धकपाले रूपे

नेकरूपेषु चित्रइत्याकारकप्रतीतिविषयत्वकल्पनेन च गौरवमिति रूपरहित
त्वेनेति समवायेनेत्यादिः प्रसंगादिति द्रव्यचाक्षुषं प्रतिसमवायेनैव रूपस्य
कारणत्वादिति भावः रूपवत्समवेतत्वे स्वाश्रयसमवेतत्वसंबंधेन रूपे ^
प्रत्यक्षत्वप्रयोजकमिति प्रत्यक्षविषयत्वप्रयोजकमस्त्वित्यर्थः गौरवादि
ति साक्षात्संबंधेन कारणत्वापेक्षया गौरवादित्यर्थः चित्रावयवककपा
लैरारब्धघटस्य चाक्षुषत्वानुरोधेन स्वसमवायिसमवेतसमवेतसम^
वेतत्वसंबंधेनैव रूपस्य तत्प्रयोजकत्वमंगीकर्त्तव्यं एवं च त्रुटेश्चाक्षुषानु
त्वा २ पपत्तिरपि दूरष्टव्या प्रत्यक्षानुपपत्तेरिति एतेन चित्ररूपवद्भिन्नरसोऽपि सिद्ध्ये
दिति शंका निरस्ता द्रव्यलौकिकरासनस्याप्रसिद्ध्या तदनुपपत्त्यभावे =८:५८

संकपालिकावयवरूपं तत्समवायी कपालिकावयवाः तत्समवेताः कपालिकाः तत्समवेतं कपालं तत्समवेतत्वं घटे इति संबंधेन ॥४=

त०गा टी०
पृ० १९

आदिनारूपांतरोत्पत्तिपरिग्रहः॥४=

नचित्ररसासिद्धेरितिसंक्षेपः रसत्वइति रसनाग्राह्यगुणविभाजकोपाधि
मत्वेतात्पर्यं एवंगंधलक्षणेपि मात्रपदमिति चक्षुरग्राह्यत्वमिंद्रियग्राह्य
गुणविभाजकोपाधिमत्वमितिफलितोर्थः परमाणुष्वेवपाकइति पर
माणुष्वेवपूर्वरूपपरावृत्त्यादिजनकतेजस्संयोगइत्यर्थः एवकारव्यवच्छे
द्यंस्फुटयति नद्व्यणुकाविति आमपाकनिक्षिप्तेघटेइति घटेआमपा
कनिक्षिप्तेसतिश्यामघटनाशेपरमाणुषुरूपांतरोत्पत्तावित्यन्वयः तत्र
परमाणुरूपे अवयविनिपाकानंगीकारादाह कारणरूपमिति परमा
णुष्वेवपाकंवदतांवैशेषिकाणामयमाशयः वेगातिशयवेगवतातेज
सापरमाणूनामभिघातसंयोगेसत्यवश्यंतेषुक्रियाजायते ततोविभा

अवयव्यनधिकरणेषु ॥ =

गस्तत आरंभकसंयोगनाशे सत्यवश्यं यावदवयवविनाशात्ततः स्वतंत्रेषु परमाणुषु ॥ गु १
रूपांतरोत्पत्तौ पुनरदृष्टादिघटितसामग्रीवशात्परमाणुक्रियाविभागादिक्रमे ॥ पु २
मेण यथास्थितमहावयविपर्यंतमुत्पत्तिः अवयविन्येव पाकेवदतां नै
यायिकानां त्वयमाशयः तेजसां परमाणूनामभिघातसंयोगे पितस्यावि
नाशकपः यमत्त आरंभकसंयोगप्रतिद्वंद्वि विभागजनकक्रियाजनकत्वमानाभावे
नावयविन्येव पाकस्वीकार उचितः अतएव सोयं घट इति प्रत्यभिज्ञासंग
च्छते अन्यथावयवविनाशाद्यकल्पनेन लाघवं चेति नचावयविरूपे प्रत्य
अवयविरूपनाशं प्रतिरू वयवरूपस्य तन्नाशे सत्यां अवयवनाशस्य हेतुतायां व्यभिचार इति वाच्यं ।
कार्यतावच्छेदककोटौ वैजात्यं निवेशेन व्यभिचारवारणसंभवात् जला ।

वैजात्यं च पाकाजन्यत्वे गम्यम् ॥ =
विजातीयरूपोत्पत्तिं प्रति अवयवरूपसमसमवायिकारणम्
विजातीयरूपनाशं प्रत्यवयवनाशो हेतुः ॥ १ =

त० दी०
पृ० २०

द्वावित्यर्थ इति यद्यपि रूपादिचतुष्टये जन्यत्वं बाधितं तथापि यथायोगमन्वये ।
नात्पर्यं उद्भूतत्वमिति उद्भूतत्वं जातिः न च शुक्लत्वादिना सांकर्यं गुणत्वसांक । गुणेषु सांकर्यं स्य २ =
क २ र्यं न बाधकमिति नवीनमतानुसारेणायं ग्रन्थः इति न दोषः केचित्तु शुक्लत्वा
दिव्याप्यमनुद्भूतत्वं नाना तन्न दृश्यमानघटवत्त्वमेवोद्भूतत्वमित्याहुः मूले द्वि त ४
त्वादिकं तु सर्वत्रानित्यमेवेति हेतुमूलापेक्षा बुद्धिनाशेन द्वित्वनाशादि । दि
निभावः परिमाणस्य गुणत्वे बाधकशङ्के विभजनमसंगतमतो दीपिका ।
यो भावप्रधान इति असाधारणेनेति कालादेः साधारणकारणत्वे ।
न तत्र नातिव्याप्तिरिति भावः स्वात्यन्ताभावेति स्वप्रतियोगित्वसमाना
नाधिकरणयोभयसंबंधेनाभाववत्त्वमिति तु निष्कर्षः संयोगनाशक २ व १

संयोगनाशकपदनिवेशे फि १ =

प्रतियोगितासम्बन्धेन नाशं प्रति नाशत्वेन प्रतियोगिनः कारणत्वम् २ =

तीति न च तथापि संयोगेऽतिव्याप्तिस्तस्य प्रतियोगिविधया नाशं प्रति कारणत्वा
दिति वाच्यं प्रतियोगितासंबंधानवच्छिन्ननाशनिष्ठजन्यतानिरूपितजन ।
कत्वविवक्षणेनादोषादिति केचित् परे तु संयोगनाशत्वावच्छिन्ननिरूपि
तसमवायावच्छिन्नकारणत्वमिति निष्कर्षः एतेनात्यन्ताग्राहके गुण ।
पदमित्याहुः विभागाइति आद्यमध्यमाद्यवृत्तिरित्यर्थः आद्येतीति ।
आद्यत्वमिह स्वसमानाधिकरणपतनप्रतियोगिकध्वंसासमानका
लिकत्वं द्वितीयपतनादीनां प्राथमिकपतनध्वंससमानकालिकत्वा
न्निरास इति भावः तदाहेति नैमित्तिकमाहेत्यर्थः पिंडीभावेति पिंडीभा ती २

संयोगस्य स्वनाशं प्रति नाशत्वेन कारणत्वा न्नदोषः ५ =

समवायेन विभागस्य संयोगनाशं प्रति कारणत्वमिति तात्पर्यग्राहकम् ४ =

द्वितीयादिपतन ३ =

नं० टी०
प० २१

वः संयोगविशेषः भेरीदंडसंयोगजन्य इति आद्येऽसमवायिकारणं भेर्या
काशयोः संयोगः निमित्तकारणं तु भेरीदंडसंयोगः द्वितीये वंशदलाकाश
विभागोऽसमवायिकारणं दलद्वयविभागो निमित्तकारणं तृतीये तु पू
र्वपूर्वशब्दः असमवायिकारणं पवनादिनिमित्तकारणमिति विवेकः ।
जानामीत्यादि ज्ञानत्वमात्रे लक्षणं जानामीत्यनुव्यवसायगम्यत्वं तु
ज्ञानत्वस्य प्रमाणसिद्धत्वसूचनाय तथा हि घटं जानामीत्याद्यनुगता
नुव्यवसायस्यानुगतधर्ममंतरानुपपन्नत्वेन तस्य स्वीकर्त्तव्यतया ला
घवाज्जातित्वसिद्धिः इत्थं च सर्व्वे सर्वव्यवहारहेतुरिति बुद्धेः स्वरूपकथ
नमिति भावः संस्कारस्य त्रिविधत्वादाह भावनाख्य इति प्रत्यभिज्ञा

प्रत्यभिज्ञायां २=

यामतिव्याप्तिरिति सोयंदेवदत्त इत्याद्याकारकप्रत्यभिज्ञायां तत्तद्देशकाल
वृत्तित्वरूपतत्तासंस्कारजन्यत्वस्य सत्वेन तत्रातिव्याप्तिरिति भावः मात्रे
तीति यद्यपि संस्कारमात्रजन्यत्वे संस्कारेतराजन्यत्वे सति संस्का
रजन्यत्वे तत्वस्मृतावसंभवि तत्रसंस्कारेतरात्मादिजन्यत्वसत्वात्त
थापि चक्षुराद्यजन्यत्वे सति संस्कारजन्यत्वे तात्पर्यमवसेयम्
मूलेतद्वतितत्प्रकारकोऽनुभव इति सप्तम्यर्थः विशेष्यत्वमाश्रय
तासंबंधेनान्वयि तथाच तद्वद्विशेष्यकतत्प्रकारकानुभवत्वं यथा
र्थानुभवलक्षणं तत्पदार्थः प्रकारः तद्वत्वं प्रकारतावच्छेदकसंबंधेन

स्मृतौ ४=

निरूपकतासंबंधावच्छिन्नाश्रयतेत्यर्थः ३=

तथाच तद्वन्निष्ठविशेष्यतानिरूपिततत्प्रकारकत्वैतदवच्छिन्नविशेष्यताकप्रकारतानिरूपकानुभवत्वमितिलक्षणं पर्यवसितम् ॥ २८ ॥

नं० टी०
४०२२

॥ उक्तलक्षणविवक्षायामपि रजतत्ववत्शुक्तिविशेष्यकरजतत्वप्रकारकानुभवस्य कालिकसंबंधेन सत्वात् ।

न । ग्राह्यं तेनकालिकसंबंधेन शुक्त्यादौ रजतत्वसत्वेपि इदं रजतमितिभ्रमेनातिव्याप्तिः नचतथापि रंगत्वेनरजतावगाहि निरजतत्वेन चरंगावगाहिनि इमेरंगरजते इत्याकारकसमूहालंबनभ्रमे ऽतिव्याप्तिस्तत्ररंगविशेष्यकत्वरंगत्वप्रकारकत्वयो रजतविशेष्यकत्वरजतत्वप्रकारकत्वयोश्चसत्वादितिवाच्यं तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वविशिष्टानुभवत्वरूपार्थविवक्षणेनादोषात् तथाहि यथोविषयतयो निरूप्यनिरूपकभावस्तन्निरूपितविषयितयोरेवावच्छेद्यावच्छेदकभाव इति सिद्धांतः दर्शितभ्रमे रंगत्वप्रकारतायां रंगविशेष्यता

यथाचघटो यमितिज्ञाने ॥८॥

ऽतिव्याप्त्यभावात् ॥३॥

भ्रमे ॥

निरूपकभावस्तादृशविषयतानिरूपितयोर्ज्ञाननिष्ठयोर्घटत्वप्रकारकत्वघटत्ववद्विशेष्यकत्वयोर्घटत्ववद्विशेष्यकत्वावच्छिन्नघटत्वप्रकारकत्व ...

निरूपितत्वस्य रजतत्वप्रकारत्ता यां च रजतविशेष्यतानिरूपितत्वस्या
सत्वेन रंगविशेष्यकत्वावच्छिन्नरंगत्वप्रकारकत्वरजतविशेष्यक
त्वावच्छिन्नरजतत्वप्रकारकत्वयोर्भावान्नातिव्याप्तिः स्मृतिव्यावृ
त्तयेऽनुभवत्वनिवेशः एतत्फलमनुपदं स्फुटीभविष्यति ननु त
द्वतीत्यस्य तदधिकरणा इत्यर्थकतया घटे घटत्वमिति प्रमाया
मव्याप्तिः स्वाधेयतायाः वृत्त्यनियामकतया तेन संबंधेन घट
रूपप्रकाराधिकरणाप्रसिद्धेरित्याशयेन शंकते ननु घटे घ
टत्वमितीति तद्वतीत्यस्य तत्संबंधिनीत्यर्थः एवं च घटत्वस्यापि

मतत्ववान्घटत्वति
प्रतीत्यभावाद्वृत्तिभा
वः ३=

त० दी०
प० २३

घटसंबंधितया तादृशप्रमायां संबंधे यत्तया घटसंबंधिघटत्वविशेष्य
कत्वावच्छिन्नघटप्रकारकत्वस्य सद्भावान्नाव्याप्तिरिति समाधत्ते १
यत्रेति यथार्थानुभव एवेति एवकारेण यथार्थस्मृतिव्यवच्छेदः २
यथार्थज्ञानमात्रस्य प्रमात्वे स्मृतिकरणस्य प्रमाणान्तरापत्तेरि अनुभवस्य २=
ति अतिव्याप्तिरिति संयोगाभाववति संयोगप्रकारकत्वसत्त्वादि
तिभावः यदवच्छेदेनेति यदवच्छेदेन यत्संबंधावच्छिन्नप्रतियोगि
ताकयदभावस्तदवच्छेदेन तेन संबंधेन तत्प्रकारकानुभवस्य
विवक्षितत्वादित्यर्थः संयोगाभावावच्छेदेनेति संयोगाभावा
वच्छेदकावच्छेदेनेत्यर्थः संयोगावच्छेदेन संयोगावच्छेदकावच्छेदेन

मूलावच्छेदेनेत्यर्थः १=

शाखावच्छेदेनेत्यर्थः ॥२=

प्रकार३=

संयोगसंबंधस्येति समवायसंबंधेनसंयोगस्येत्यर्थः अत्रेदमवधेयं इदमव्याप्य।
वृत्तिसंयोगादिप्रकारकप्रमानुरोधेनव्याप्यवृत्तिरजतत्वादिप्रकारकभ्रमलक्ष
प्रकारताऽवच्छेदकःसंबंधोत्रविवक्षितः ॥३= णंतु तत्संबंधावच्छिन्नप्रतियोगिताकतदभाववान् यस्तद्विशेष्यकत्वा
वच्छिन्नतत्संबंधावच्छिन्नतत्प्रकारकत्वविशिष्टानुभवत्वं प्रतियोगिता। रता४
योप्रकारतावच्छेदकसंबंधावच्छिन्नत्वनिवेशात् पर्वतोवह्निमानि
तिप्रमायांसमवायावच्छिन्नवह्न्यभाववत्पर्वतविशेष्यत्वसत्त्वेपिनाति। क३
व्याप्तिः विशेष्यत्वप्रकारित्वयोरवच्छेद्यावच्छेदकभावविवक्षणेन।
इमेरंगरजतइत्याकारकप्रमायांरंगत्वाद्यभाववद्रजतादिविशेष्यकत्व।

विशेष्यकत्वप्रकारकत्वयोः ॥२=

इदं च प्राचीनमताभिप्रायेण व्यापारस्यैव करणत्ववादिनः नवीनमते तु चक्षुरादावतिव्याप्तिर्व्यापारशून्यत्वपदप्रक्षेपेण निरसनीयेत्यपि बोध्यम् ॥८॥

रंगत्वादिप्रकारकत्वयोः सत्त्वेऽपि नातिव्याप्तिरित्यलमतिविस्तरेण ॥ प्रमेयंगा
दिति स्मृतस्योपेक्षानर्हत्वं प्रसंगस्तस्मादित्यर्थः सामान्यतोऽवगतस्यै लक्षणरूपेण २=
विभागरूपेण ३४ वविशेषरूपेण प्रतिपादनं संभवतीति सामान्यलक्षणं स्फुटयति प्रमा
याः करणं प्रमाणमिति असाधारणेतीति दिक्कालादृष्टादेः कार्यत्वा
वच्छिन्नं प्रत्येव कारणत्वात् अनुभवत्वव्याप्यधर्मावच्छिन्नप्रमावृत्तिका प्रत्यक्षत्वाऽनुमितित्वादिः ५=
र्यतानिरूपितकारणत्वरूपप्रमासाधारणकारणत्वस्य तत्रासत्त्वान्ना कालादौ ३=
तिव्याप्तिः व्यापारवत्त्वे सतीत्यपि वक्तव्यमतश्चक्षुःसंयोगादौ नातिव्या
प्तिः श्रोत्रमनःसंयोगः शब्दो वा व्यापारः संभवत्येवेति न श्रोत्रे द्वियेक

समवायस्यानित्यत्वेन प्रादुर्भावनापत्तेर्व्यापारत्वासंभवादाह श्रोत्रमनःसंयोग इति ॥११॥

चक्षुःसंयोगाद्यसत्वदशायां १ त्रुटि

स्वेतरयावत्सामग्रीसत्वे इति शेषः तेन चक्षुरादिविलंबात्त्वचा त्रुट्याद्युत्पादेपि न चक्षुरादावतिव्याप्तिः १=

अनुमितिकरणं च ४=

रणालक्षणं व्याप्तिरिति वदंति यद्विलंबात्प्रकृतकार्यानुत्पादस्तत्कारणत्वस्यासा
धारणत्वात्मकतया कालादिषु तादृशकारणत्वाभावान्नातिव्याप्तिः व्यापारत्वे-
नाभिमतेंद्रियसंयोगादिकमेव करणं एतच्च लिंगपरामर्शोनुमानमिति मूल एव स्फु
टीभविष्यति अत एव मणिकारैरप्युक्तं तच्च लिंगपरामर्श इति ग्रंथेनेति नव्याः अ
धिकरणसमवायमणिप्रभायामनुसंधेयम् नियतेतीति नियतत्वं हि व्यापकत्वं
एषमे ६= तच्च रासभादेर्न संभवतीति तत्र न घटकारणत्वातिप्रसक्तिरिति भावः पूर्ववृत्तीति
स्वव्यापकत्वस्य स्वस्मिन्सत्त्वेपि स्वपूर्वकालवृत्तित्वस्यासत्वेनातिप्रसंग इति भावः न२४
कार्यतावच्छेदकसंबंधेन कार्याधिकरणे कार्याव्यवहितप्राक्क्षणावच्छेदेन विद्यमा-

तं० टी०
प्र० २५

नांतंताभावप्रतियोगितानवच्छेदकतद्धर्मवत्त्वं तेन रूपेण कारणत्वमिति समुदि
तार्थो बोध्यः कारणं स्यादिति तस्य नियतपूर्ववृत्तित्वादिति भावः निबंधांतरेष्व
न्यथासिद्धेः पंचविधत्वेपि मणिकारमताभिप्रायेणाह त्रिविधेति येन सहै
वेत्यादि येन तंतुना सहैव यस्य तंतुरूपस्य यं पटं प्रति पूर्ववृत्तित्वमवगम्यते तं
पटं प्रति तत्तंतुरूपं तेन तंतुनाऽन्यथासिद्धमित्यर्थः अत्र सहितत्वमेकज्ञानविष
यत्वं बोध्यं तंतुरूपस्य पटपूर्ववृत्तित्वज्ञानेऽनतिप्रसक्तेः तंतुरूपत्वेनैव विषयता
वाच्या तथा च तंतुरूपमन्यथासिद्धं एवं तंतुत्वस्य पूर्ववृत्तित्वज्ञानमपि तंतुविष
यकमेवेति तदप्यन्यथासिद्धमिति भावः येनेत्यस्य स्वतंत्रान्वयव्यतिरेकशालिने

तंतुरूपं पटपूर्ववृत्तित्वस्या
कारकज्ञानविषयतातंतु
रूपस्य वाच्याऽस्यान्वयः
॥ ३ ॥

स्वतंत्रान्वयव्यतिरेकशून्येन १=

तंतुरूपादि ३= शब्दसमवायिकारणत्वं पाकाशत्वेनाकाशस्य घटं प्रति पूर्ववृत्तित्वेन ग्रहीतुमशक्यमाकाशत्वं ४=

ति यस्येत्यस्य च स्वतंत्रान्वयव्यतिरेकशून्यस्येति विशेषणं बोध्यं तेन तन्तैर्यामस्तेनतं- सहभूतेन १=
तुत्वेन तंतोरन्यथासिद्धिः नवा तंतुसंयोगस्य तंतुनासहान्यथासिद्धिरिति संक्षेपः तथामस्तेनेत्यनुच्यते २=
तंत्वादि ३= ष्ठतेरान्वयव्यतिरेकप्रयुक्तान्वयव्यतिरेकशालियत्तदन्यथासिद्धमिति तु परे शा- तं परे इत्यनेनास्वरसः
ह्रेयंतीति आकाशत्वं हि शब्दसमवायिकारणत्वं तथा च शब्दकारणत्वमग्रहीत्वा सद्वीजं तु तंतुसंयो
आकाशस्याकारणत्वेन घटपूर्ववृत्तित्वं ग्रहीतुमशक्यमित्याकाशोऽन्यथासि- गाद्यान्वयव्यतिरेकप्र
द्ध इत्यर्थः अन्यत्रक्लृप्तेति अपाकजस्थले गंधं प्रति क्लृप्तनियतपूर्ववर्तिना युक्तान्वयव्यतिरेकशालि
गंधप्रागभावेनैव पाकजस्थलेपि तत्संभवे रूपप्रागभावोऽन्यथासिद्ध इत्यर्थः तंत्वादेरन्यथासिद्धत्वाप
अपेवं नियतपदं व्यर्थमनियतरासमादेस्ततोपान्यथासिद्धत्वेन सत्यंतेनैव वा त्तिरिति ३=

अनेनैवसर्वेषांसंग्रहसंभवादितिभावः ३ =

रणासंभवादिति चेन्न घटसामान्यं प्रत्यन्यथासिद्ध्यसंभवात् अन्यत्रघटभिन्नेपटादौ
कृतत्पूर्ववर्त्तित्वेनसत्त्वादितोघटोऽन्यसंभवादिति नवीनाः पुनरेवमाहुः लघुनियतपू
र्ववर्त्तिनएवकार्यसंभवेतद्भिन्नमन्यथासिद्धमित्येकमेवान्यथासिद्धत्वं लघुत्वंच
शारीरकृतमुपस्थितिकृतंसंबंधकृतंच तत्रप्रथममनेकद्रव्यसमवेतत्वापेक्षया
महत्वे द्वितीयं गंधंप्रति रूपप्रागभावापेक्षया गंधप्रागभावे गंधस्यप्रति
योगिनउपस्थितत्वेन शीघ्रंतदुपस्थितेः तृतीयं दंडत्वदंडरूपाद्यपेक्षयादंडा
दौ स्वाश्रयदंडसंयोगादिरूपपरंपरायागुरुत्वात् एवंचैतावतैवनिर्वाहेऽन्यथा
सिद्धित्रिविधापंचधाचेतिप्रपंचोव्युत्पत्तिवैचित्र्याय नचनियतेतिपदंव्यर्थं रास
भादेरन्यथासिद्धत्वेनैववारणादिति वाच्यं यत अन्यथासिद्धत्वस्याननुगतस्यदु

एकविधान्यथासिद्ध
त्वस्वीकारेकारणल
क्षणेनियतपदंव्यर्थं
= २ =

॥ उक्तलक्षणस्यसर्वत्राऽननुगतत्वेच ३ =

वंचनतयापत्रपत्रश्यामाणिकानामन्यथासिद्धत्वव्यवहारस्तत्तच्छेदककूटं निवेशनीयं लघु
नियतेत्यादिकं तु भेदप्रतियोगितत्तद्व्यक्तिपरिचायकमित्यं च तत्रानियतानेतरासमा
दीनामेकेन नियतत्वविशेषणेनैव वारणात्तत्तच्छेदककूटनिवेशे गौरवं नियतानां
दंडत्वादीनां त्वनापत्त्या तत्तच्छेदकत्वं निवेशनीयमित्यभिसंधिरिति यस्मिन्सम
घटत्वादिधर्मैः वेतमित्यर्थ इति यद्धर्मावच्छिन्नं कपालत्वादि यद्धर्मावच्छिन्ने समवायेनोत्पद्यते तद्धर्मावच्छि। घटत्वादिधर्मैः ४=
कपालत्वादिधर्मैः ३= न्नं प्रति तद्धर्मावच्छिन्नं समवायिकारणमिति परमार्थः कारणेन पटेनेति स्वकार्यं। असमवायिकारणा३=
समवायिकारणेन पटेनेत्यर्थः स्वं तंतुरूपं पटादिकं प्रति तुरीतंतुसंयोगादीनाम
समवायिकारणत्ववारणाय तत्त दसमवायिकारणलक्षणे तद्भिन्नत्वं देयं।

निर्विषयकज्ञानस्यांऽप्रसिद्धत्वान्निर्विकल्पकज्ञानविषयत्वा… [illegible]

मितिदिक् ननु तुरीयविषयतानिरूपकस्य निर्विकल्पकज्ञानस्य निरूपकतासंबंधेन
प्रकारताशून्यत्वमिव विशेष्यताशून्यत्वं संसर्गताशून्यत्वं च लक्षणं संभवति विनिग
ब मनाविरहादित्यतो लक्षणत्रयं प्रदर्शयति विशेष्येति विशेष्यत्वाद्विविधया विशेष्या-
द्यनवगाहिज्ञानमित्यर्थः तथा च ज्ञानत्वघटिते विशेष्यताशून्यत्वं विशेषणताशू-
न्यत्वे संसर्गताशून्यत्वे चेति लक्षणत्रयं पर्य्यवसितमिति भावः केचित्तु ननु निष्प्रका-
रकत्वे प्रकारताशून्यत्वे प्रकारता च भासमानवैशिष्ट्यप्रतियोगित्वं संसर्गावच्छि-
तथाचोभेरवं ३= न्नविषयतेति यावत् तथा च संसर्गानवगाहिज्ञानत्वमेव संसर्गताशून्यज्ञानत्वमे-
व वा लक्षणं भासतां लाघवादित्यतस्तथैव मूलार्थमाह विशेष्येत्याहुस्तच्चिन्त्यं सिद्धां तो २
ते संसर्गतायाइव प्रकारतायाअपि विलक्षणविषयतात्मकत्वेन निष्प्रकारकज्ञा-

भासमानवैशिष्ट्यप्रतियोगित्वरूपप्रकारत्वस्य ॥
सत्वे घटत्वाद्यौ सत्वेऽभावेनाव्याप्तेरिति भावः १=

इंद्रियजन्यप्रत्यक्षाविषयत्वतया विषयतासम्बन्धेन स्वप्रत्यक्षं प्रति तादात्म्येन निर्विकल्पकस्य प्रतिबंधकत्वादिति भावः २ =

नत्वरूपलक्षणे गौरवान्नवकाशादितिदिक् निर्विकल्पकस्यातींद्रियतया तत्र प्रत्यक्षप्रमा
णं संभवादनुमानं प्रमाणयति गौरितीति विशिष्टज्ञानत्वादिति विशिष्टबुद्धिं प्रतिवि
शेषणज्ञानस्य कारणत्वान्नाप्रयोजकत्वशंकेति भावः अनवस्थाप्रसंगादिति सवि
कल्पकस्य विशिष्टबुद्धित्वेन विशेषणज्ञानजन्यत्वनियमादिति भावः विशेषणवि
शेष्यसंबंधावगाहीति अत्राप्युक्तरीत्या लक्षणत्रयं बोध्यम् मनइंद्रियेणेति सं
युज्यतइत्यनेनान्वयः एवमग्रेपि आत्मप्रत्यक्षसंग्रहस्तु आत्मा मनसा संयुज्यते
ततः प्रत्यक्षज्ञानमुत्पद्यते इतियोजनांतरेणाकर्णश्रोत्रसंबंधइति नच श्रोत्रस्य न
भोरूपत्वेन तत्समवायो दूरस्य शब्दस्य प्रत्यक्षत्वं इति शंक्यम् अतिप्रसंगाभंगापकर्णवि

दूरस्य शब्दप्रत्यक्षापत्तिः २ =

न० टी०
प्र० २८

वर्ऽवच्छिन्ननभोऽनुयोगिकत्वविशिष्टसमवायस्यैव प्रत्यक्षहेतुत्वांऽगीकारेणातादृशसंबं
धस्य दूरस्थशब्देऽभावादिति भावः प्रथम[illegible]त भेरीदंडसंयोगेन नभसि शब्द उत्पद्यते ते
न शब्दास्तैश्च पुनः शब्दा इत्येवं क्रमेण निखिलदिगवच्छेदेन शब्दोत्पत्तेरंगीकरणीयतया
तद्देशेऽपि सामान्यनिर्वाहायाह कदंबेति द्रष्टव्यमिति अत्रेदमवधेयम् विशेषणतानां संयु
क्तविशेषणतात्वादिरूपेण बहुविधत्वेऽपि विशेषणतात्वेनैव परिगणनान्न षड्विधत्व
हानिः नचैवं समवायत्वेनैव संयुक्तसमवायादीनामनुगमः कुतो न कृत इति वाच्यं स्वतंत्रे
च्छस्येत्यादिन्यायानुसरणेनादोषादिति एतेनाभावप्रमायां विशेष्यविशेषणभावसं
न्निकर्षजन्यत्वप्रदर्शनेन प्रमाणान्तरत्वं प्रत्यक्षाद्यतिरिक्तप्रमाणत्वं नन्वपलब्धेः ना

२८

प्रमेयेति शेषः १

प्रमात्मिकेति शेषः १

प्रमाणांतरत्वानंगीकारे घटोपलब्धिदशायां तदभावप्रत्यक्षापत्तिः प्रमेत्तेतु अ ... २

नुपलब्ध्यात्मकप्रमाणांतराभावान्नापत्तिरितिमाहाशंकां परिजिहीर्षुर्योग्या

नुपलब्धेरिंद्रियसहकारितामात्रेणैवनिर्वाहे अतिरिक्तप्रमाणत्वमसंभवीत्या

ह यद्यत्रेत्यादिना अत्र चक्षुःसंयोगादिमद्भूतले तर्कस्यापादकाभावस्या

घकविपर्ययप्रतियोग्यापाद्यकत्वरूपं विपर्ययेतर्ककोटिपर्यवसायित्वं दर्शय

ति दर्शनाभावान्नास्तीति तद्दर्शनाभावात्तत्रास्तीत्यर्थः तर्कितेत्यादि तर्किता आ

पादितापतियोगिनो घटादेः सत्वस्य सत्वप्रसक्ते विरोधनीयाउपलब्धिस्ता

आजन्यत्वे सति स्वजन्य जनकत्वं सहकारित्वम्

आपाद्याभाव

तर्ककोटीति आपादका भावकोटीत्यर्थः

१ तर्कापादकत्वं २ तर्कितेत्यर्थः ३

अन्यथाऽऽहार्यघटोपलम्भे प्रतियोगि घटा
भावप्रत्यक्षानुपपत्तिः स्यादिति भावः ॥२॥

प्रतियोगिकोऽभावोऽनुपलब्धिस्तत्सहकृतेनेत्यर्थः विरोधित्वविशेषणमनुपलब्धेरना
हार्यत्वसूचनाय प्रतियोगिसत्त्वापादनापादितोपलंभप्रतियोगिकत्वरूपयोग्यता
विशिष्टानुपलब्धिसहकृतेनेति परमार्थः आलोकसंयोगाद्यसत्त्वदशायामयमत्र
घटः स्यात्तर्हि उपलभ्येतेत्यापादनासंभवेन योग्यानुपलब्ध्यभावान्नतत्रघटाभाव
प्रत्यक्षमिति संक्षेपः केचित्तु तर्कितेत्यादि तर्कितमारोपितं यत्प्रतियोगिसत्त्वं त
द्विरोधिनी याऽनुपलब्धिस्तत्सहकृतेनेत्यर्थः एतावता प्रतियोगिसत्त्वरूपकार
णाभावप्रयोज्यः उपलब्ध्यभावः अभावप्रत्यक्षेकारणं नतु इतरकारणविरहप्र
योज्य उपलब्ध्यभाव इति हि सूचितमत एवान्धकारे उपलम्भाभावसत्त्वेऽपि नघटा

भावप्रत्यक्षमित्याहुः नन्वभावप्रमायामिंद्रियस्यकरणत्वमनुपलब्धेःसहकारित्वंचतत्वं नैयायिकेन१=
याकल्पनीयंतदपेक्षयाऽनुपलब्धेःएवकरणत्वकल्पनंवरमित्याशंक्याभावाधिक
रणभूतलप्रत्यक्षेइंद्रियस्यावश्यमपेक्षणीयतयाक्लृप्तत्वेनैवेंद्रियकरणत्वेनाभा
वप्रत्यक्षोपपत्तावनुपलब्धेर्विजातीयप्रमितिकरणत्वकल्पनमप्रयुक्तमित्याह।
अधिकरणेति ननु विशेष्यविशेषणभावाख्यःसंबंधोतिरिक्तःकल्पनीयस्तथा
पेत्यत आह विशेष्यविशेषणभावइति अत्रेदंबोध्यं प्रत्यक्षंद्विविधं लौकिकमलौ
लौकिकसन्निकर्ष किकंचेति लौकिकत्वंविषयिताविशेषः लौकिकेषोढाहेसन्निकर्षःकारणं अलौ। जन्ये१=
जन्यत्वेतुपलौकिकत्वस्येश्वरज्ञानेऽसंभवादाहलौकिकत्वंचेति१=
।।लौकिकसन्निकर्षजन्यज्ञानेश्वरज्ञानोभयसाधारणीविषयितेत्यर्थः१=

त० दी०
प्र० ३०

किंकेनसामान्यलक्षणोज्ञानलक्षणोयोगजधर्मश्चेतित्रिविधप्रत्यासत्तिः तत्रसामान्य
६२ लक्षणाधूमत्वादिरूपा ज्ञानरूपावासामान्यंलक्षणंस्वरूपंविषयोवायस्येतिव्युत्प
त्तेः साचाऽऽश्रयाणांनिखिलधूमादीनामऽलौकिकप्रत्यक्षेउपयुज्यतेऽतीतानागतधू
मादिषुचक्षुसंयोगादेरऽसंभवात् इंद्रियाणामऽसन्निकृष्टानांप्रत्यक्षाऽजनकत्वात् ज्ञा
नलक्षणातुसुरभिचंदनमितिचाक्षुषोपनीतभाने सौरभेणचक्षुषोयोगसन्निकर्षाऽ
घ्राणसंयुक्तसमवायस्य वाघघ्रहे योग्यत्वादिति भावः २= संभवात् एवंयोगिनांदेशकालविप्रकृष्टपदार्थप्रत्यक्षेयोगजधर्मः प्रत्यासत्तिरितिसंक्षे
पः ॥ इतितर्कसंग्रहदीपिकाप्रकाशेभगवद्दर्पितेप्रत्यक्षपरिच्छेदः ॥ ॥ अनु ।
मानंलक्षयतीति प्रत्यक्षोपजीवकत्वसंगत्याऽनुमानंनिरूपयति इत्यर्थः परामर्श ज्ञानलक्षणाभिधा न प्रयोजकः संबंधः संगतिः १=

प्रत्यक्षनिष्ठोपजीव्यतानिरूपितोपजीवकत्वसंगत्येत्यर्थः १=

कारणता= कार्यत्व=

केषांचिन्मते विपरीतज्ञानोत्तरमनुमितिरेव यथा न च तत्रानु
मितिरिति वाच्यमितिदीपिकायां कृतेरभिप्रायः तन्मतमव
लंब्याह विपरीतेति ॥२३॥

प्रत्यक्षोपमि २= । अनुमितिरिति पभिन्ना प्रत्यक्षादिविलक्षणप्रमाणजन्य
निष्पन्नबोधः त्वात् यन्नैवं तन्नैवं यथा प्रत्यक्षवत् ॥२=

अनुमानं प्रमाणं प्रत्यक्षादि विलक्षणं
विलक्षणप्रमितित्वात् यन्नैवं तन्नैवं यथा प्रत्यक्षवत् २=

तीति तथा च प्रत्यक्षप्रमित्यपेक्षयानुमितेर्विलक्षणप्रमितित्वेनानुमानस्य प्रमाणा
न्तरत्वं सिद्ध्यतीति भावः विपरीतज्ञानोत्तरप्रत्यक्षं प्रति विशेषदर्शनस्य हेतुत्वमंगीकु
र्वतामस्मतमवलंब्य शंकते नन्विति स्थाणुपुरुषसंशयेति इदं विरुद्धभावद्वयको
टिकसंशयांगीकारेण परेतु स्थाणुपुरुषेति स्थाणुत्वतदभावकोटिकेत्यर्थः
त्याहुः पुरुष एवेति निर्णयसूचनाय तत्र संशयोत्तरप्रत्यक्षस्थले अनुव्यवसा
यविरोधादिति इदमुपलक्षणं पुरुषमनुमिनोमीत्यनुव्यवसायाभावेन प्र
माणाभावादित्यपि द्रष्टव्यं संशयोत्तरप्रत्यक्षे जननीयेव व्याप्यमाणपक्षतायाः
परामर्शसहकारित्वे प्रयोजनाभावेन पक्षतासहकृतपरामर्शजन्यत्वविवक्ष

विपरीतं विरुद्धकोटिद्वय
प्रकारकं संशयज्ञानम् २=

व्याख्येयम् २=

उक्तभावद्वयकोटिक
संशयप्रदर्शनम् ३=

पुरुष एवायं इति ज्ञानस्या
नुमितित्वे प्रमाणाभावा
दित्यर्थः २=

न० टी०
प्र० ३१

विशेषणोपविशेषणंतद्विशेषणतावच्छेदकं रः

णान्नातिव्याप्तिरित्याह पक्षतेति एतेन वह्निव्याप्यधूमवत्पर्वतवानयमिति विशिष्टवैशिष्ट्या
वगाहिबुद्धिं प्रतिविशेषणतावच्छेदकप्रकारकनिर्णयविधया वह्निव्याप्यधूमवत्पर्वत ।
इतिपरामर्शस्यकारणत्वेपिनतत्रातिव्याप्तिः पक्षतासहकृतपरामर्शजन्यत्वस्याह ।
त्वेनातिव्याप्तेरभावादितिसंक्षेपः पद्यपिसाध्यसंशयस्यपक्षतात्वेपिसाध्यनिश्चय
कालेऽनुमितिवारणंसंभवति तथापिघनगर्जनेनमेघानुमितौव्यभिचारोतोन्या
दृष्टींपक्षतामाह सिषाधयिषेति सिषाधयिषायाःसाध्यानुमितीच्छायाः स ।
मवायेनयोऽभावःस्वरूपसमवायैतदुभयघटितसामानाधिकरण्यसंबंधेनत ।
द्विशिष्टायाःसिद्धेःसमवायेनाभावइत्यर्थः साध्यसिद्धिःपक्षतावच्छेदकविशिष्टसा ।
ध्यतावच्छेदकविशिष्टसाध्यवैशिष्ट्यावगाहिनिश्चयइत्यर्थः सिद्धौसिषाधयिषाविर ।

समवायसंबंधावच्छिन्न
प्रतियोगिताकः रुः

अभावीयविशेषणतारुः
तेनद्रव्यंवह्निमदित्यादि ॥
सिद्धेःप्रतिबंधकमवच्छेदः रः

धूमनिरूपितव्याप्तिविशिष्टस्वस्वव्याप्यवह्न्यवगाहित्वेन तत्
हेतिपक्षधर्मताज्ञानस्याभावादव्याप्तिः ५८ ॥

धूमेपक्षवृत्तित्वज्ञानं
विषयतासंबंधेन ३

॥ तथा च धूमव्याप्यवह्निमानयः पिंड इति भ्रमात्मकव्याप्तिविषयकपक्षधर्मताज्ञानसंग्रहसमर्थत्वेपि =३॥:४२९

ष्टं वैशिष्ट्यनिवेशनस्य प्रयोजनं दर्शयति सिद्धिसत्वेपीति सिद्धिश्च पर्वतो वह्निमान् व १
ह्निव्याप्यधूमवांश्चेति समूहालंबनरूपाऽतः परामर्शसंपत्तिरिति ध्येयं॥ व्याप्तिविशि १
ष्टपक्षधर्मताज्ञानमित्यत्र व्याप्तिविशिष्टे पक्षधर्मता व्याप्तिविशिष्टपक्षधर्मता १

व्याप्तिविशिष्टपक्षधर्म
ताज्ञानमर्थः

ज्ञानमिति सप्तमीतत्पुरुषांगीकारे व्यभिचारिलिंगकानुमितौ व्याप्तिविशिष्टपक्ष

धूमवान् वह्नेरित्यादौ ४=

धर्मताज्ञानजन्यत्वाभावेनाव्याप्तिरतो व्याप्तिविशिष्टपदस्य व्याप्तिविषयिकेत्यर्थ
मवलंब्य ज्ञानेति तत्पदेन कर्मधारयमंगीकरोति व्याप्तिविषयकमिति व्याप्यवच्छिन्नप्र १

विशेष्यताभिन्नाधूम
निष्ठाप्रकारता २=

कारतानिरूपितपक्षतावच्छेदकावच्छिन्नविशेष्यताशालिनिश्चयः परामर्श इत्यनुमिति १

वह्निव्याप्यधूमवान्पर्वत
इत्याकारकः २=

लितार्थः अभिनीय अभिलापकशब्दमुच्चार्य नियतसामानाधिकरण्यं साध्याभाव १

ता २

उद्बोधकः =

विषयितासम्बन्धस्य हेत्यनियामकत्वाद्व्याप्तिविशिष्टमिति विहाय व्याप्तिविषयकमित्युक्तम् २=
तः

॥ यद्वन्निष्ठप्राप्तिनिरूप्यमित्यर्थः ॥ १ ॥ साध्याविना साध्यवदन्यत्वादिघटितग्रहः ॥ १ ॥

वदेव वह्नित्वादिरूपं न संभवति इदं वाच्यं ज्ञेयत्वादित्यादावव्याप्तेः साध्याभाववदवृत्तित्वस्य असिद्धेरित्यालोच्या
ह हेतुसमानाधिकरणेति वह्निमान्धूमादित्यादौ धूमसमानाधिकरणो योऽत्यन्ताभावो घटात्यन्ता
भावस्तदप्रतियोगी वह्निस्तत्समानाधिकरणं धूमेऽस्तीति लक्षणसमन्वयः धूमवान्वह्नेरित्या
दौ तु धूमसामान्याभावस्यापि हेतुसमानाधिकरणतया तत्प्रतियोग्येव धूम इति नातिव्याप्तिः

महानसीयवह्न्यभावेत्यादि वह्न्यभावस्य

न च वह्निमान्धूमादित्यादौ तत्तद्वह्न्यभावस्य चालनीन्यायेन धूमसमानाधिकरणतया तादृशा
भावाप्रतियोगित्वेन कस्यापि वह्नेरित्यव्याप्तिरिति वाच्यं अप्रतियोगिसाध्येत्यस्य प्रतियोगितान
वच्छेदकसाध्यतावच्छेदकावच्छिन्नेत्यर्थतात्पर्यकतयाऽदोषात् प्रतियोगितायां साध्यतावच्छेदक
संबंधावच्छिन्नत्वं निवेशनीयं तेन वह्निमान्धूमादित्यादौ समवायेन वह्नित्वावच्छिन्नप्रतियो
गिताकाभावस्य धूमसमानाधिकरणत्वेपि न क्षतिः हेतुपदे हेतुतावच्छेदकावच्छिन्नपरं अतो

महानसीयवह्नित्वादेः प्रतियोगितावच्छेदकत्वेपि ॥
वह्नित्वस्य प्रतियोगितानवच्छेदकत्वान्नाव्याप्तिरित्यर्थः ३

॥ गुणकर्मभेदविशिष्टसत्तावत्वात् ॥

विशिष्टं शुद्धान्नातिरिच्यत ॥
इतिन्यायेन शुद्धाभिन्नत्वेत्यर्थः ॥

ता

न चात्र शुद्धसत्तात्वा
वच्छिन्नविशिष्टसत्ता
याम्गुणादौ सत्त्वेऽपि वि
शिष्टसत्तात्वावच्छिन्न
विशिष्टसत्ताया गु
णादिवृत्तित्वाभा
व्याप्तिरिति भावः ॥

द्रव्यं विशिष्टसत्त्वादित्यादौ विशिष्टस्य शुद्धानतिरेकितया हेत्वधिकरणगुणादिनिष्ठ
त्वेऽपि द्रव्यत्वाभावस्य नाव्याप्तिः हेत्वधिकरणता हेतुतावच्छेदकसंबंधावच्छिन्ना
ग्राह्या तेन वह्निमान्धूमादित्यादौ वह्निसामान्याभावस्य धूमसमवायिनिष्ठ
त्वेऽपि नाव्याप्तिः न चैवमपि कपिसंयोगी एतद्वृक्षत्वादित्यादावव्याप्तिः साध्य
स्य हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नत्वादिति वाच्यं
हेतुसमानाधिकरणाभावे प्रतियोगिवैयधिकरण्यस्यापि विशेषणीयत्वात् ।
केवलान्वयिसाध्यकेतादृशघटाभावादेः प्रसिद्धत्वान्नाव्याप्तिरिति अधि
कमस्मदीयमणिदीधितिव्याख्यायां बुद्धिकुशलैरनुसंधेयम् ॥ स्वार्थान् ।

धूमावयवनिष्ठत्वेऽपि ॥

हेत्वधिकरणवृत्तिप्रति
योगिव्यधिकरणस्य ॥

व्याप्तिस्मृतिहेतुत्वात् ३=

मिति।

मिति॥ स्वस्यार्थः प्रयोजनं साध्यसंशयनिवृत्तिरूपं यस्या इति व्युत्पत्त्या स्वीयसंश
यनिवृत्तिप्रयोजनकानुमितिमित्यर्थः परामृशन्निति एकसंबंधिज्ञानमपरसंबं — उद्बोधकविधयेति भावः १=
धर्मदर्शनस्य २= धिस्मारकमितिरीत्या दर्शनस्य स्मृतिहेतुत्वादिति भावः कथं व्याप्तिग्रह इति व्य
भिचारज्ञानदशायां न कश्चिदपि व्याप्तिनिश्चयमभ्युपैतीति भूयोदर्शनस्य — स्फुटीकरोति ४=
कारणत्वं ५= व्याप्तिनिश्चयहेतुत्वेन संभवतीति भावः इदमुपलक्षणम् भूयोदर्शनमित्य
स्य भूयसां दर्शनानां समाहार इति भूयसां साध्यहेतूनां दर्शनमिति भूयस्स्व
धिकरणेषु दर्शनमिति वार्थः नाद्यः एकत्रैव सहचारदर्शनधारया व्याप्ति
अत्र भूयस्त्वस्याधिकरणेन सहान्वयो भवति २= निश्चयप्रसंगात् न द्वितीयतृतीयौ एतद्रूपवानेतद्धूमादित्यादौ साध्यहेत्वोर

अत्र भूयसामित्यस्य दर्शनेन सहान्वयो भवति ३=

अत्र भूयसामित्यस्य साध्यहेतुना सहान्वयो भवति ३=

तथा च हेतुतावच्छेदकसंबंधावच्छिन्नहेतुतावच्छेदकावच्छिन्नहेत्वधिकरणवृत्तिप्रतियोगि।।

साध्यहेतुसहचारदर्शनस्य साध्यहेत्वधिकरणस्य चा= व्यधिकरणात्यन्ताभावीयसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकसाध्यतावच्छेदका

धिकरणे च भूयस्त्वाभावेन व्याप्तिनिष्कर्षानुत्पादप्रसंगात् इत्यपि बोध्यम् मणिकार

सिद्धान्तमवलंब्याह व्यभिचारज्ञानविरहेति व्याप्तिग्राहकत्वादिति व्याप्तिश्च हेतुस

यद्धेतुतावच्छेदकं तद्रूपत्वमेवेतिभावः ४= मानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकावच्छिन्नसा

ध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकरूपैव सामानाधिकरण्यं तस्य रासभा

अनुपस्थितस्यापि ज्ञातेः स्वरूपतो भानमितिभावः ५= दिसाधारणत्वात् धूमत्वादेः स्वरूपतो व्याप्यतावच्छेदकत्वे तादृशधूमत्वत्वादिरूपेण

च व्याप्तित्वमित्यवच्छेद्यावच्छेदकयोरैक्येपि न क्षतिः इत्यं च साध्यतावच्छेदकेन यावि

अव्यभिचाररूप २= धप्रतियोगितानवच्छेदकत्वोपपूर्णग्रहे साध्यतावच्छेदकेन तथाविधप्रतियोगितावच्छे =२।९९९५९२

दकत्वरूपव्यभिचारग्रहाभावो विपरीतग्रहाभावविधया हेतुः साध्यसमानाधिक

विरोधिज्ञानाभावरूपतया=

। मूलस्थ अधिकरणे व्याप्यव्यापकयोर्दर्शनमिति फलितम्।। ८=

च्छिन्नसाध्यसामानाधिकरण्यमितितवक्ष्ये

नं० टी०
प० ३७

ननु हेतुव्यापकसाध्यसामानाधिकरण्यवृत्ति
हेतुतावच्छेदकमिति एवकारार्थः ३ =

स्वार्थक्रमः यत्र प्रथमं [illegible] व्यादेशांतरं ततः तत्र वह्नि [illegible] दृश्यति तत्रोत्तरक्षणे वह्निरूपविषयाभावात् भ्रमात्मकवह्न्यनुमित्यापत्तिः पः=

रणाद्वृत्तिहेतुतावच्छेदकांशग्रहहेतुविशेषणज्ञानविधया सामानाधिकरण्यज्ञानं हेतुरि ।
तिरीत्या व्यभिचारज्ञानाभावसामानाधिकरण्यज्ञानयोर्व्याप्तिग्रहहेतुत्वेनेति ध्येयम् ।
वस्तुतस्तु हेतुव्यापकसाध्यसामानाधिकरण्यमेव व्याप्तिः न च व्याप्तेरसमसाधा ।
रण्येन प्रमात्मकत्वासमलिंगकपरामर्शात् भ्रमात्मकवह्न्यनुमित्यापत्तिः प्रमात्मक ।
परामर्शस्य प्रमानुमित्यजनकत्वनियमसत्त्वेनेष्टापत्तेरयोगात् इति वाच्यम् यद्ध ।
र्मावच्छिन्नव्यापकत्वं व्याप्तिघटकं तद्धर्मितावच्छेदकं व्याप्तिप्रकारकनिश्चयस्यैवा ।
नुमितिहेतुत्वोपगमेनादोषात् अत एव व्याप्तिशरीरे धूमत्वत्वाप्रवेशेन लाघवमि
ति दिक् शंका चेति व्यभिचारसंशयस्यापि व्याप्तिग्रहप्रतिबंधकत्वानुभवात् तत्साधा

यद्धर्मपदेन धूमत्वादि परिग्रहः पः=
कः १
विशेष्यतावच्छेदक ३=
हिसायेति वः १=

॥ सामानाधिकरण्यं तन्मात्रस्य व्याप्तित्वादेव २=

संशयनिश्चयसाधारण्य—

राहमत्वधर्मावच्छिन्नव्यापकत्वस्योक्तव्याप्तिघटकत्वेन राहमविशेष्यकव्याप्तिप्रकारकनिश्चयस्यानुमित्यहेतुत्वा

३७

हेतुसमानाधिकरणात्यंताभावप्रतियोगितानवच्छेदकत्वावच्छेदकत्वोभयकोटिज्ञाने धर्मिज्ञाने सहचारेति ।। शंकेत्युपलक्षणं तेन व्यभिचारनिश्चयविरहोपीति बोध्यः ।१=
व्याप्याभावरूपतर्काभावेतरसंशयकारणसमवधानस्य स्थले इत्यर्थः ।।२=
ना।

णाद्व्यभिचारज्ञानत्वावच्छिन्नाभावो हेतुरिति हृदयं तद्विरहः व्यभिचारशंकाविरहः क्वचि
दिति तर्काभावेतरनिखिलकारणसमवधानस्थले इत्यर्थः क्वचित् स्वतः सिद्धएवेति ।
इतरकारणविरहस्थले तादृशकारणविरहप्रयुक्तएवेत्यर्थः तथाच तत्र तर्कापेक्षानेति
जायमानेऽपीति ४= धूमाग्न्योरिति धूमाग्न्योर्व्याप्तिग्रहे उत्पत्स्यमाने व्यभिचारशंकानिवर्त्तकः कार्यकार ।
णभावभंगप्रसंगलक्षणस्तर्क इत्यन्वयः सचतर्कः धूमो यदि वह्निव्यभिचारी स्यात् ।
तर्हि वह्निजन्यो न स्यादित्याकारको बोध्यः ननु महानसीयवह्निधूमयोः सन्निकृष्टत्वे
न सहचारग्रहेऽप्यन्येषां वह्निधूमानामसन्निकर्षेण सहचारप्रत्यक्षासंभवेन निखि
लधूमेषु व्याप्तिप्रत्यक्षं न संभवति तथाच पर्वतीयधूमदर्शनेन व्याप्तिस्मरणासंभ ।
।। पर्वतीयधूमे व्याप्तेरगृहीतत्वादिति भावः ।१=

इंद्रियसंबद्धविशेष्यज्ञानप्रकारीभूतसामान्यलक्षणरूपेत्यर्थः २=

वान्यपरामर्शानुपपत्तिरित्याशयेन शंकते ननु सकलेति सकलवह्निधूमेष्वलौकिकसन्निकर्षा
भावेपि सामान्यप्रत्यासत्त्यात्मकालौकिकसन्निकर्षसद्भावात् वह्नित्वावच्छिन्नसामाना
धिकरण्यत्वेन निखिलवह्निधूमसहचारप्रत्यक्षसम्भवान्निखिलधूमेषु व्याप्तिग्रहः
संभवति एवं च पर्वतीयधूमेपि व्याप्तेर्गृहीतत्वेन धूमदर्शनेन व्याप्तिस्मरणासंभवान्न प
रामर्शानुपपत्तिरिति समाधत्ते वह्नित्वे धूमत्वेति यद्यपि परार्थानुमान प्रयोज्यस्य परस्य
मध्यस्थस्यार्थः प्रयोजनं साध्यानुमिति [illegible] रूपं यस्मादिति व्युत्पत्त्या परस
मवेतानुमितिकरणलिंगपरामर्शोर्थः एतावता स्वार्थानुमितिपरार्थानुमित्योर्लिंग
परामर्श एव करणमित्यायातं समूलं साधु संगच्छते तथापि परार्थानुमानप्रयोजके

मूलस्य प्रतिज्ञादिपंचकसमुदायप्रयो ॥न्यायघटितत्वाच्चास्त्रप्यपि न्यायमिति व्यवह्रियते३= साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकबोधजनकवाक्यमिति विवक्षितोऽउदाहरणेऽतिव्याप्तिर्वोध्यः ॥ ४=

ज्यलिंगपरामर्शादित्यर्थः साध्यवत्तया पक्षवचनमिति ॥४= किंतुव्याप्त्यंशे साध्यतावच्छेदकावच्छिन्नवैशिष्ट्यावगाहित्वम६

पक्षतावच्छेदकावच्छिन्नपक्षविशेष्यकबोधजनकवाक्यमिति विवक्षितोऽउपनयेऽतिव्याप्तिर्वोध्यः ॥५=

पंचावयववाक्ये परार्थानुमानशब्दस्यौपचारिकप्रयोग इति मनसि कृत्य मूलमवतारय ॥ति परार्थानुमानमाहेति पंचावयववाक्यमित्यनेन पंचावयवाः यस्य वाक्यस्येति व्यु॰ त्पत्त्या प्रतिज्ञादिवाक्यपंचकसमुदायत्वं न्यायलक्षणं वोध्यं अनेन प्रतिपादिता॰ ल्लिंगादिति साध्यतावच्छेदकावच्छिन्नसाध्यप्रकारकपक्षपक्षतावच्छेदकावच्छिन्नप॰ क्षविशेष्यकबोधजनकवाक्यमित्यर्थः उदाहरणात् साध्यतावच्छेदकविशिष्टवै॰ शिष्ट्यावगाहिज्ञानेन पक्षतावच्छेदकविशिष्टे उपनयाच्च पक्षतावच्छेदकविशि॰ ष्टेन साध्यतावच्छेदकविशिष्टवैशिष्ट्यज्ञानमिति तयोर्निरासः वाक्यपदस्यन्या॰ यावयववाक्यपरत्वान्न्यायवहिर्भूतवाक्यव्युदासः एवमग्रेपि अयं च न दंडो हि॰

वगाहि २१

प्रत्येकपदं इति न्यायत्वात् इत्याकारकत्तुपि(?)

रातन्यायघटकत्वपरत्वात् ६= ॥ उदासीनवाक्यव्युदासः१= ॥ निषेधः१= उदाहरणादिलक्षणेपि वाक्यपदं न्यायावयवपरमित्यर्थः१= उदाहरणोपनय वाक्येऽतिव्याप्तिनिरासः २=

अनादितात्पर्यविषयतिलक्षणानिरूढलक्षणा ४=

उक्तसंयोगाज्जन्यद्रव्यत्वादित्यादौ प्रतिज्ञार्थांशे च संयोगत्वसत्त्वादिति व्याप्तेर्वारणाय लिंगप्रति॥
पादकमिति हेतुप्रतिपादकवाक्यमित्यर्थः प्रकृतहेतोरिति व्याप्तिप्रतिपादकमिति प्रकृत
हेतुव्यापकत्वविशिष्टसाध्यबोधकवाक्यमित्यर्थः कथमुदाहरणस्य व्यापकत्वबो॥
धकतेति चेदित्थं साध्यपदस्य हेतुव्यापकत्वविशिष्टसाध्ये निरूढलक्षणा॥ नच द्विरु॥ या ४
स्य ५ क्तेःपत्यर्द्धवैयर्थ्यमिति शंक्यं तादृशतात्पर्यग्राहकतया सार्थक्यात् अथवा प्रथमप
त्पदार्थे महानसे द्वितीयपदत्पदार्थे च महानसान्यस्मिन् प्रकृतहेतुमत्त्वस्य प्रथमत॥
त्पदार्थे महानसे द्वितीयतत्पदार्थेऽन्यस्मिन्साध्यस्य च शाब्दबोधे जाते उत्तरकाले॥
व्यापकताबोधो मानसः तथा च व्याप्तिप्रतिपत्तिपरत्वमुदाहरणस्योक्तमिति॥

महानसं २

दोषलेशः १=

विशिष्टबोधजनकवाक्यमित्यर्थः ६=

नकश्चिद्दोषोंऽधइतिदिक् व्याप्तिविशिष्टलिंगप्रतिपादकमिति पक्षतावच्छेदकवि
शिष्टविशेष्यकप्रकृतसाध्यव्याप्यहेतुप्रकारकबोधजनकवाक्यमित्यर्थः पक्ष
धर्मताज्ञानार्थमुपनय इतिपाठेतुप्रयुज्यतेइतिशेषपूरणेनप्रदर्शितोर्थएवप
याकर्येचिंतेगमनीयः हेतुसाध्यवत्तयापक्षवचनमिति हेतुज्ञान ज्ञाप्य त्व ४
विशिष्टसाध्यवह्निविषयकबोधजनकवाक्यमित्यर्थः उत्तरकालमबाधितास
त्प्रतिपक्षितत्वविषयबोधोमानसोदृष्टव्यः ननुविशिष्टवैशिष्ट्यावगाहिपरा
मर्शस्यानुमितिंप्रतिहेतुत्वेतत्रान्यथासिद्धत्वनियतपूर्ववृत्तित्वयोर्द्वयोः कल्प
नीयतयागौरवं वह्निव्याप्योधूमोधूमवांश्चायमितिज्ञानद्वयस्यतवमतेविशि

नैयायिकमते १=

गृह्यमाणो व्याप्यतावच्छेदकप्रकारकं पक्षधर्मताज्ञानमनुमितिकारण
मिति मीमांसकमतं दूषयति कथंचिदित्यादिना ॥३=

॥ त्वया मीमांसकेनाभिमतस्य कारणस्य ज्ञानद्वयस्य २=

दृष्टपरामर्शेऽनुमितिकारणत्वेन क्लृप्तस्य कारणत्वेनाऽनन्यथासिद्धत्वमात्रस्य कल्पनीय
तया लाघवमिति प्राभाकरः शंकते नन्विति वह्निव्याप्यवान्पर्वत इति अत्र त्वदभिम॰
तकारणस्यासत्त्वेन व्यभिचारान्न ज्ञानद्वयस्य कारणत्वं संभवतीति भावः कथंचिदि॰
ति व्याप्यतावच्छेदकधूमत्वादेर्भानं परामर्शे न संभवतीति स्फोरणाय धात्वेति ला
घवेनेति कल्पनालाघवेनेत्यर्थः तथाहि ज्ञानद्वयेऽनन्यथासिद्धत्वनियतपूर्ववर्तित्व
त्वकल्पनापेक्षया विशिष्टपरामर्शे तत्कल्पनस्यैव लघीयस्त्वमिति वस्तुतस्तु तद्ध॰
र्मावच्छिन्नविशेष्यकव्याप्तिप्रकारकनिश्चयविशिष्टतद्धर्मावच्छिन्नप्रकारकपक्षता
वच्छेदकावच्छिन्नविशेष्यकनिश्चयत्वस्यैव कारणतावच्छेदकत्वं ज्ञानद्वयसा॰

धूमाद्रूपरामर्शस्थले २=

धूमो वह्निव्याप्यः २=

धूमवान्पर्वतः २=

विशिष्टत्वं च स्वसमानाधिकरणएककालिकविशेषणतासंबंधेन बोध्यम् २=

क २५

मीमांसकेन १=   ॥उदयनाचार्याणांमतं २=

धारणायांऽनुरोधेनतेनमतत्वं नैयायिकमतेतेतु व्याप्तिविशिष्टवैशिष्ट्यावगाहिनिश्चयत्वं
कारणतावच्छेदकमितिकारणतावच्छेदकलाघवमितिध्येयं विनिगमनाविरहात् हे २
यमानलिंगत्वेनापिकारणत्वंवदतामाचार्याणांमतंनिरस्यति लिंगंनकरणमि
अतीतादौ ४= ति व्यभिचारादिति तत्रांप्यनुमितेरनुभवसिद्धत्वेनतदव्यवहितपूर्वंभूतभविष्यद्भूमा
देरसत्वादितिभावः मतइति फलायोगव्यवच्छिन्नंकारणमितिमतेतु परामर्शणावक
रणमितिध्येयं करणेतिव्याप्तिवारणाय तज्जन्यत्वेसतीति यद्यपि अनुमाननिरू
पणासैव प्रतिज्ञातत्वेनतद्विभागणवोचितः तथापि लिंगस्यत्रैविध्येप्रदर्शिते तद
ज्ञानस्यत्रैविध्यंफलतीतिमनसिकृत्याह लिंगंविभजतइति अन्वयेनव्यतिरेकेण

जन्यज्ञानविषय १=   निबेद्यतया २=

चव्याप्तिमदिति मूलस्यान्वयसहचारग्रहणाद्व्याप्तिमत्त्वे सति व्यतिरेकसहचारग्रहणा
द्व्याप्तिमदित्यर्थं मनसि कृत्य तादृशं व्याप्तिद्वयं प्रकाशयति हेतुसाध्ययोरिति अ ।
न्वयमात्रव्याप्तिकत्वरूपकेवलान्वयिलक्षणे मात्रपदेन व्यतिरेकव्याप्तेर्व्यवच्छेद्यतया
विचार्य ४ प्रसिद्ध्यप्रसिद्धिभ्यां व्याघातः इति पर्यालोच्य प्रकारान्तरेण परिष्करोति केवलान्वयि । विवरणं करोति ४=
साध्यकमिति केवलान्वयिसाध्यकव्यतिरेकिहेतोः संग्रहाय साध्ये केवलान्वयित्वं निवे केवलान्वयिलक्षणं १=
निरवच्छेदक ३= शितं तदेव निर्वक्ति अत्यन्ताभावेति निरवच्छिन्नवृत्तिमदत्यन्ताभावेत्यर्थः तेन गगनाभा
वसंयोगाभावादिसाध्यकहेतोः संग्रहः घटपदाभिधेयत्वस्य पटादावसत्त्वेन स
र्वत्र सत्त्वासंभवादाह सर्वपदाभिधेयत्वमिति मूले व्यतिरेकमात्रव्याप्तिकमिति ।

केवलान्वयिलक्षणं ३=   अत्यन्ताभावप्रतियोगि ४= घटोऽभिधेयः प्रमेयत्वात् इति ४=   घटो गगनाभाववान् द्रव्यत्वात् ॥ =
घटो संयोगाभाववान् द्रव्यत्वादित्यादिहेतोः ४ =

निश्चितव्यतिरेकव्याप्तिमात्रकमित्यर्थः तेन पृथिवी इतरेभ्यो भिद्यते गंधवत्त्वादित्याद-
सपक्षरूपायाः १= द्वौ अन्वयव्याप्तेः सत्त्वेऽपि न लक्षणासंगतिः इतरभेदः पृथिवीतरत्वावच्छिन्नप्र-
तियोगिताकभेदः अन्वयित्वमिति अन्वयसहचारग्रहयोग्यव्याप्तिमत्त्वं स्यादित्य- जन्यज्ञानविषय ३=
पर्वतो वह्निमान् धूमव-
त्त्वादित्यनुमानं ४= र्थः तथा च प्रसिद्धानुमानमित्येवैतदप्यन्वयिव्यतिरेक्येव स्यादित्यर्थः असाधार-
णमिति सपक्षविपक्षव्यावृत्तत्वरूपासाधारणलक्षणाक्रान्तत्वादिति भावः अ-
प्रसिद्धसाध्यकेऽपि कथं साध्यविशेषणकानुमितिरेवेत्यभिप्रायेणाह साध्ये-
त्यादि व्यतिरेकव्याप्तीति साध्याभावव्यापकीभूताभावप्रतियोगित्वरूपेत्यर्थः
पृथिवीतरत्वाव-
च्छिन्नभेदः ५= पृथिवीतरसामान्यभेदो न साध्यते अपि तु जलादिभेदकूटं साध्यते तथा च नो-
अपिपदेन हेत्वाभासपरिग्रहः यथा हेत्वाभासस्थले नानुमितिस्तथात्रापि इति भावः ६=

समदायत्व

तादेव्यवसरः इत्याह जलादीति जलादीनां येत्रयोदशान्योन्याभावास्तेषां कूटं सा
ध्यतइत्यर्थः समुदायस्य प्रसिद्ध्यसंभवादाह प्रत्येकमिति त्रयोदशत्वावच्छिन्ने
ति अनुमितेः पूर्वं निश्चित साध्यतावच्छेदकावच्छिन्नवतो धर्मिण एवाप्रसिद्ध्या
न तत्र हेतोः सत्वासत्वनिर्वंधनेऽन्वयित्वासाधारण्ये इति समुदितार्थः प्रत्ये
कं प्रसिद्धावपेक्षाबुद्धिविशेषविषयत्वरूपसमदायत्वविशिष्टज्ञानं संभवति
तथाच विशेषणतावच्छेदकप्रकारकनिर्णयस्य सद्भावात् साध्यतावच्छेदक
विशिष्टवैशिष्ट्यावगाह्यनुमितिर्व्यतिरेकव्याप्तिज्ञानं च संभवतीत्याह प्रत्ये
काधिकरणेत्यादि यद्यपि जलादिचतुर्दशान्योन्याभावानां चतुर्दशसु प्रत्ये

प्रत्येकप्रसिद्धानामिति रीत्या वक्तुमुचितं तथाऽप्यर्थापत्तेः प्रमाणान्तरत्वमङ्गीकुर्व
तं प्राभाकरमतेऽद्वैतेषु व्यतिरेकव्याप्तेरनुमितित्वंगात्वस्य प्रदर्शनीयतया तस्मात्तत्सा
धारणायेन व्यतिरेकव्याप्तिं प्रदर्शयितुं जलादित्रयोदशेत्यादिकथनं न च तन्म
ते जलादिचतुर्दशान्योन्याभावाः प्रसिद्धाः अभावस्याधिकरणात्मकस्य
तेनानंगीकारादिति ध्येयं केचित्तु जलमेवादिर्येषां त्रयोदशानामिति विग्रहेण
जलादिप्रतियोगिकानां चतुर्दशानामन्योन्याभावानामित्यर्थः त्रयोदशा
स्विति जलादीत्यादिः उक्तविग्रहेण चतुर्दशस्वित्यर्थः अग्रे ध्येयं बोध्यमित्या जलादित्यादि उक्तविग्रहेण चतुर्दशस्वित्यर्थः २=
हुः सले संदिग्धसाध्यवानिति विशेष्यतासंबंधेन साध्यासाध्यप्रकारक

पक्षविशेष्यकसंदेहविषयीभूतसाध्यवत्त्वस्य प्र
ह्रदे सत्त्वादतिव्याप्तिरतः परिष्कारोऽति विशेष्येति १=

त० टी०
प० ४०

तथा च सपक्षेनातिव्याप्तिरिति तात्पर्यम् ।=

विशेष्यतासंबंधेन साध्यप्रकारकनिश्चयविशिष्टः सपक्षः
विशेष्यतासंबंधेन साध्याभावप्रकारकनिश्चयविशिष्टो
॥ विपक्षः ।=

संशयविशिष्ट इत्यर्थः सपक्षलक्षणादिकमप्येवं परिष्कर्तव्यम पक्षलक्षणस्यो
व्याप्तिं शंकते दीपिकायां नन्विति संशयविघटकशाब्दसिद्धिस्थलेऽव्याप्तिमु
क्त्वासत्पक्षस्थलेपितामाह किंचेति उक्तेति सिसाधयिषाविरहविशिष्टसिद्ध्य
भावरूपपक्षताश्रयत्वस्य पक्षलक्षणत्वादित्यर्थः सद्धेतुं निरूप्येति व्याप्त्या
दिविशिष्टहेतुं निरूप्येत्यर्थः सद्धेतुनिरूपणोऽसद्धेतोः स्मरणात् प्रसंगासंग
त्यात तन्निरूपणमिति भावः मूले हेत्वाभासा इति हेतुवदाभासंत इति हेत्वाभा
सा दुष्टा हेतवः निरूप्यंत इत्यर्थः ननु सर्वत्र सामान्यधर्मप्रकारकज्ञानमंतरा
विशेषजिज्ञासाऽनुदयेन सव्यभिचारेत्यादिना विभागोऽनुचित इत्याशंकाम

व। यनिनीषु दोषलक्षणेऽभिहिते दोषत्वरूपदुष्टलक्षणस्यातिस्फुटत्वाल्लाभो भवतीत्या
शयेन दोषसामान्यलक्षणमाह अनुमितीति हेत्वाभासत्वमिति हेतोराभासाः
हेत्वाभासाः हेतुनिष्ठा दोषाः तेषां भावस्तत्त्वमित्यर्थः ह्रदो वह्निमानित्याद्यनुमितिं
प्रति वह्न्यभाववान् ह्रद इत्यादिबाधनिश्चयस्य प्रतिबंधकतया प्रमात्मकतादृशज्ञानि
श्चयविषयत्वे वह्न्यभाववद्ध्रदादावत्ततमिति लक्षणसमन्वयः तत्रानुमितिपद
मजहल्लक्षणयानुमितितत्करणान्यतरपरं तेन व्यभिचारादिज्ञानस्य परामर्श
प्रतिबंधकतयैव निर्वाहादनुमित्यप्रतिबंधकत्वेपि व्यभिचारादिषु नाव्याप्तिः।
पर्वतो निर्वह्निरिति बाधभ्रमस्य पर्वतो वह्निमानित्यनुमितिप्रतिबंधकत्वात्तद्विष
यवह्न्यभावादावतिव्याप्तिरतो यथार्थेति भ्रमभिन्नेत्यर्थः अर्थेवमपि वह्न्यभा

वह्न्यभावावच्छिन्नह्रद२=

ननु यद्रूपपदेन वह्न्यभाववत्वस्यापि धर्तुं शक्यत्वाद्वह्न्य
भावेऽतिव्याप्तिस्तदवस्थेत्यत आह वह्न्यभावत्वेति३=

वह्निहृदात्मकबाधैकदेशे वह्न्यभावादावतिव्याप्तिः वह्न्यभाववान्ह्रद इत्याकारकज्ञान यथार्थे १
विषयत्वस्य तत्र सत्वादिति चेन्न यद्रूपावच्छिन्नविषयकज्ञानसामान्यमनुमितिप्रति
बंधकं तद्रूपावच्छिन्नत्वं दोषत्वमित्यर्थपर्यवसानेनादोषात् वह्न्यभावत्वावच्छिन्न
विषयकस्य वह्न्यभाववान्ह्रद इति ज्ञानस्यानुमितिप्रतिबंधकत्वेपि तादृशज्ञानसा
मान्यांतर्गतस्य वह्न्यभाव इत्याकारकज्ञानस्याप्रतिबंधकत्वेन वह्न्यभावत्वादेर्यद्रूप
पदेनोपादानासंभवात् न च तर्हि यथार्थपदं व्यर्थं पर्वतो निर्वह्निरिति भ्रमविषयेपि
वह्न्यभावादावतिव्याप्तेरुक्तरीत्यैव वारणसंभवादिति वाच्यम् ज्ञानपदस्य ज्ञानवि
शेषतात्पर्यग्राहकतया यथार्थपदसार्थक्यात् एवं च यद्रूपावच्छिन्नविषयकाना
हार्यप्रामाण्यज्ञानानास्कंदितनिश्चयसामान्यं प्रकृतानुमितिप्रतिबंधकं तद्रू
पावच्छिन्नत्वं दोषत्वमित्यर्थः पर्यवसितः तेन वह्न्यभाववद्ध्रदविषयकस्याहार्यस्या

वह्न्यभावविशिष्टह्रद३=

वह्न्यभावत्वावच्छिन्नविषयक४=

यद्रूपावच्छिन्नविवक्षणी यत्वेन ४=

पर्वतस्य वह्निमत्वेन वह्न्यभाववानवच्छिन्नत्वादिति भावः४=

अविषयीकृत२=

बाधकालीनेच्छाजन्यज्ञानमाहार्यं तद्भिन्नमनाहार्यम२= अविषयीकृत२=

विशेषस्तु २=

वह्न्यभाववान्ह्रद इत्याकारकयथार्थज्ञानस्यानु
मितिप्रतिबंधकत्वेपि ताद्दृशज्ञानसामान्यस्याप्र
तिबंधकत्वादसंभवः १=

सामान्यज्ञानविशिष्टज्ञानस्यसंशयस्यचानुमित्यप्रतिबंधकत्वेपिनासंभवइत्यलं
पल्लवितेन परे तु इदंदुष्टानामेवलक्षणं परेतुज्ञायमानव्यभिचारादेः प्रतिबंधक
त्वमभ्युपेत्य तद्दूषयंति अनुमितिप्रतिबंधकायेव्यभिचारादयः एकज्ञानविषय
व्यभिचारादि ४= प्रकृतहेतुतावच्छेदकवत्वसंबंधेनतत्प्रकारक यथार्थज्ञानविशेष्यत्वं धूमवा
न्वह्नेरित्यादौधूमाभाववद्वृत्तित्वविशिष्टवह्निर्व्यभिचारः उक्तसंबंधेनतद्वान्वह्नि
रित्याकारकयथार्थज्ञानविशेष्यत्वमस्तीतिलक्षणसमन्वयः अनुमितिपदस्य
प्रकृतानुमितिपरतयासद्धेतावप्यनुमितिप्रतिबंधकीभूतव्यभिचारादीनामप्रसि
द्धेत्वानातिव्याप्तिः यथार्थपदादाने दर्शितसंबंधेनव्यभिचारप्रकारकभ्रम
विशिष्टत्वस्यसद्धेतावपिसत्वेनातिव्याप्तिःस्यादितितन्निवेशइत्याहुः सत्रिविं॥

व्यभिचारादिविषयक
ज्ञानविषय ३=

एकज्ञानविषयप्रकृत
हेतुतावच्छेदकवत्वसंबं
धेनधूमाभाववद्वृत्तिव
ह्निमान्वह्निः ५=

न० टी०
प्र० ४२

संयोगसंबंधावच्छिन्नवह्नित्वावच्छिन्नवह्न्यभावस्य दैशिकविशेषणतया पर्वते वृत्तिमत्त्वस्य कालिकसंबंधविशेषणतावच्छिन्नत्वादतिव्याप्तिरित्यर्थः

घटइतीति सामान्यलक्षणं तु साधारणाद्यन्यतमत्वं स्फुटम् मूलेतत्रेति साधार-
णादिषु मध्ये इत्यर्थः साध्याभाववद्वृत्तिरिति साध्यतावच्छेदकधर्मसंबंधाव-
च्छिन्नप्रतियोगिताकाभाववन्निरूपितहेतुतावच्छेदकसंबंधावच्छिन्नाधेयता-
वानित्यर्थः तेन वह्निमान्धूमादित्यादौ तत्तत्साध्याभावस्य संबंधांतरावच्छिन्न-
सामान्याभावस्य च सत्त्वेऽपि साध्याभाववति धूमावयवादौ समवायादिना
धूमादेर्वृत्तित्वेऽपि च नातिव्याप्तिः अत्र च साध्याभाववत्तायां संबंधविशेषा-
वच्छिन्नत्वानिवेशे वह्निमान्धूमादित्यादौ वह्न्यभावस्य कालिकादिसंब-
धेन पर्वतादौ वृत्तेरतिव्याप्तिः दैशिकविशेषणताविशेषावच्छिन्नत्वनिवेशे
घटत्वाभाववान् साध्यके व्यभिचारिणि साध्याभावस्य घटत्वादेर्विशेषणतावि

यद्धो घटत्वाभाववान् द्रव्यत्वात्॥ द्रव्यत्वे॥

=६=

एवमपेपि १
साध्यवत्ताग्रहविरोधितानियामकः ३=

षेषेणांऽधिकरणांऽप्रसिद्धौऽव्याप्तिरंऽतः साध्यतावच्छेदकसंबंधेन साध्यवत्ताग्रहंप्रति
ऽवाऽऽहमानेनेति यत्तुस्मृतिरूपंस्वप्नज्ञानमिति तद्व्याप्यादिविरुद्धमित्युपेक्षितं कोट्योरेव्या

घटतत्वमावव्याप्यवृत्तिरिति

प्यवृत्तित्वज्ञानोत्तरंज्ञायमाने एकस्मिन्धर्मिणिधर्मतदभावोभयप्रकारकसमूहरूपेऽतिव्या

प्तिवारणाय विरोधविषयकात्वस्य निवेशेऽपिनानेत्यस्याऽवश्यकतेतिदर्शयितुमाऽऽह घटत्व

विरुद्धेति नानेतीति एकधर्मिनिष्ठविशेष्यतानिरूपितविरुद्धनानाधर्मनिष्ठप्रकारताकत्वा ऽऽ

भावान्नातिव्याप्तिरिति भावः नच विभिन्नरूपेणैकधर्मिविशेष्यविरुद्धानेकधर्मप्रकारक

पर्वतोवह्निमान्द्रव्यंच

ह्रुमाववत १=

ज्ञाने ऽतिव्याप्तिरितिवाच्यं एकधर्मावच्छिन्नविशेष्यताघटितपरिष्कारकरणेनादोषादिति

दिक् तेजोतरेब्रह्मभिन्नेसर्वस्मिन्नेवमिथ्याशब्दस्यप्रयोगदर्शनादाऽऽह तदभाववतीति प्र

माणाय्यैदं तदभाववद्विशेष्यकत्वावच्छिन्नतत्प्रकारताकत्वाद्यर्थविवक्षणात्सम्य

रंगरजतेऽत्याकारकभ्रमायाम १=

आहार्य्यव्याप्यवत्ताभ्रमजन्य इति २=

[illegible]

आहार्य्यव्याप्यवत्ताभ्रमजन्योत विशेषणानुक्तौ विशेष्यमात्रेपि तर्केऽतिसंपन्नतर्कलक्षणस्याहार्य्यज्ञानमात्रेऽतिप्रसंगइत्यर्थः ३=

हार्य्यत्वेनेऽतिप्रसंगः संशयस्येच्छाया अत्रवारणाय संशयान्यज्ञानार्थकनिश्चयपदं इति

संक्षेपः मूलेव्याप्यारोपेणेति आहार्य्यव्याप्यवत्ताभ्रमजन्यः आहार्य्यव्यापकवत्ताभ्र

मस्तर्क इत्यर्थः आहार्य्यज्ञानमात्रेऽतिप्रसंगवारणाय तज्जन्य इति निश्चयसत्वे अयं वृक्षः न पुरुषः ४=

शाखादौ करादिमत्त्वादयं पुरुष इत्याहार्यारोपस्तत्रातिव्याप्तिवारणाय प्रथम ।

मानाहार्य्येतु ५=

माहार्य्यपदं रजतत्वव्याप्याभाववत्ताग्रहकाले आहार्य्यपदं रजतत्वव्याप्यवत्ता ।

रजतत्वव्याप्यनीलरूपासमानाधिकरणचाकचिक्यवदिदं शुक्तिरूपद्रव्यमिति ६=

ज्ञाने तज्जन्ये इदं रजतमित्यनाहार्य्यज्ञानेऽतिव्याप्तिवारणाय द्वितीयमाहार्य्य

आपाद्यः धूमाभावः तद्व्यतिरेकः धूमः ७=

पदं तर्के आपाद्यव्यतिरेकनिश्चयः आपाद्यापादकयोर्व्याप्तिनिश्चयकारण ।

मिति ध्येयम् तर्कस्तु मानसविपर्ययरूपएवेति कथमयथार्थस्य त्रैविध्यकथन ।

[illegible]

रजतत्वव्याप्यपनीलरूपासमानाधिकरणचाकचिक्यं तदभाववत्ताग्रहोपयथा रजतत्वव्याप्यनीलरूपासमानाधिकरणचाकचिक्यवदिदं शुक्ति वदिदं

मित्याह यद्यपीति प्रमाणानुग्राहकत्वं प्रमाणे न प्रमायां जननीयायां प्रतिबंधकविघ-
टनद्वारैवोपयोगित्वं भेदेनेति तर्कत्वरूपेण लक्षणेनेत्यर्थः तर्कस्य प्रमाणानुग्राह-
भेदेनकथनस्य= कत्वज्ञापनाय तस्याकथनमिति भावः ननु सर्वेषामनुकूलतया वेदनीयमित्यादिमू-
ले सुखादिलक्षणपरं न संभवति परद्रव्योपभोगादिजन्यसुखे साधूनां द्वेषदर्शना-
दव्याप्तेरित्याशंकायां सुख्यहमित्यादि प्रत्यक्षसिद्धं सुखत्वादिकमेव लक्षणमित्याह
सुख्यहमित्याद्यन्विति सुखत्वादीत्यादिना दुःखत्वपरिग्रहः यथाश्रुतं त्विति सर्वेषा-
मनुकूलतयेत्यादिकमित्यर्थः अनुभवेतीति स्मृतिसंस्कारं च प्रत्यनुभवत्वेनैव हेतुता
कारणतावच्छेदतां प्राचामयमभिप्रायः तत्तद्विषयकज्ञानत्वेन अनुभवत्वस्यापि जाति-

तत्तद्विषयकस्मृतितादृशसंस्कारं च प्रति तत्तद्विषयकानुभवत्वेनैव हेतुतानतु ॥ त्रोट

न० टी०
प्र० ७२

त्वेन ज्ञानत्वावच्छेदेऽपि गौरवाऽभावात् नच विनिगमनाविरह इति वाच्यं व्याप्यधर्मपुरस्कारेण
कारणत्वसंभवे व्यापकधर्मस्यान्यथासिद्धेर्निरूपकत्वादिति नवीनाः पुनः तत्तद्विषयकस्मृतिं स्मृति २ =
तादृशसंस्कारं च प्रति तत्तद्विषयकज्ञानत्वेनैव हेतुतानत्वेनानुभवत्वेन संस्कारस्य फलनाशप
तया प्रथमस्मरणेनैवानुभवजन्यसंस्कारस्य नाशेन सकृदनुभूतस्य स्मरणोत्तरमस्म
संस्कार ४= प्र० १ रणासंभवात् नच स्वजन्यस्मरणस्य संस्कारनाशकत्वे स्मृतिसाधारणेन ज्ञानत्वेन हेतुत्वेऽ १
पि घटपटादिरूपनानाविषयावगाहिनानुभवेन जनितस्य तावद्विषयकसंस्कारस्य १
नां १ घटाद्यैकैकगोचरस्मरणेऽपि विनाशात्तदुत्तरं पटादिस्मरणानुपपत्तिः तद्विषय १
कसंस्काराऽभावात् स्मृतिजन्यपटादिगोचरसंस्कारस्य च भिन्नविषयतया घटा १ य १

७२

अगतगत्याः

संस्कारः

दि स्मारकत्वोपयोगादेतत्‌ः स्वजन्यचरमस्मृतेरेवानापत्त्या तत्तद्व्यक्तित्वेन तत्तत्संस्कारनाश
कतया ऽग्रिमकर्त्तव्यतया ऽनुभवत्वेन जनकतया ऽपि न दोष इति वाच्यम् अभ्यस्तविषयक
स्मरणस्य स्यैव फलस्य नाशकत्वांगीकारे ऽगौरवदोषात् जायते च पुनः पुनः स्मरणाद्दृढतरः संस्का
संस्कारः दार्ढ्यं चोत्कर्षरूपो जातिविशेषो झटिति स्मृत्युत्पादकः प्रयोजकः न च दैव
वशात्संपन्नात् झटित्युद्बोधकसमवधानादेव झटिति स्मृतिनियमोपपत्तौ न प्रयोज। तत्र ५५
कतया संस्कारगतो जातिविशेषः सिध्यतीति वाच्यम् झटिति स्मृतेर्दैवाधीनझटि।
त्युद्बोधकसमवधानाधीनत्वमुपगम्य संस्कारातिशयखंडने शास्त्रादावभ्यासस्यै
वानापत्तेः किंच परित्यज्य च निक्षिप्तान्व्यभिचारके रूपं गृह्यमाणव्यभिचारकेण।

न० टी०
प्र० ७३

न्यमते २=

कारणत्वकल्पनं न संभवतीति नानुभवत्वेन स्मृतिसंस्कारहेतुता संभवइति प्राहुः तन्म
तं दर्शयति स्मृतेरपीति अपिनाऽनुभवपरिग्रहः एतन्मते च लक्षणेऽनुभवजन्येति
स्थाने ज्ञानजन्येति निवेशनीयं द्रव्यविभाजकोपाधीति पृथिवीत्वजलत्वादिरूपं
यद्द्रव्यविभाजकोपाधिद्वयं प्रत्येकं तत्समानाधिकरणाः द्वित्वद्विपृथक्त्वसंयोगा
दयः तद्वृत्तिजातिमद्गुणत्वमित्यर्थः रूपादिषु चतुर्षु तादृशं रूपत्वादिकं सांसिद्धि
कद्रवत्वे च द्रवत्वत्वावान्तरजातिं स्नेहादिषु दशसु स्नेहत्वादिकं भावनाख्यसंस्कार
त्वावान्तरजातिं चादाय लक्षणसमन्वयः नन्विदं लक्षणमेकत्वादिष्वतिव्याप्तम्
एकत्वत्वादिजातेरपि तादृशत्वात् न च तादृशोपाधिद्वयसमानाधिकरणवृत्ति

आदिना पृथक्त्व परिग्रहः २=

द्रव्यविभाजकोपाधिद्वय २=

गुणत्वन्यूनवृत्तिजातिशून्यगुणत्वमितितदर्थः एवंचैकत्वादिषु संख्यात्वादेः सत्वा॰
श त्तादृशजातिशून्यत्वस्याऽसत्वेन नोक्तव्याप्तिरितिवाच्यम् एवमपि परिमाणादिष्वति॰
व्याप्तिः परिमाणत्वादेस्तादृशजातित्वासंभवादिति चेदत्र प्रवदंत्यभिज्ञाः यद्रूपा
त वच्छिन्नसमानाधिकरणं यत्किंचिद्द्रव्यविभाजकोपाधिद्वयं तत्तद्भिन्नास्थितिस्था तद्रूपावच्छिन्नभिन्नग्राह्यः ४८
पकवृत्तिभिन्ना च या जातिस्तद्वत्त्वे सति गुणत्वमितितदर्थः यद्रूपावच्छिन्नसामा॰
नाधिकरण्यस्य समवायघटितस्यैव निवेशनीयतया यद्रूपपदेन घटत्वादेर्धर्तु॰
गुणपदं देयं मशक्यत्वादृष्टादावतिव्याप्तिरतोविशेष्यं स्थितिस्थापकेऽतिव्याप्तिवारणाय॰
स्थितिस्थापकवृत्तिभिन्नेति स्थितिस्थापकस्य पृथिव्यादिचतुष्टयवृत्तित्वम्॰

ननु नवैयं रूपत्वादेर्यद्रूपपदेन घटं तु शक्यत्वे एवंतरजातीरादाय रूपादिषु लक्षणसम
न्वयः पार्थिवानुष्णाशीतस्पर्शस्यावयवीयावृत्त्याविजातीयस्यैवानुभवसिद्धत्वा
त् संख्यादयस्तु सामान्यगुणा इति तत्र वैजात्यं जलपृथिव्यादिभेदेन सिद्धांतसिद्ध
मतस्तत्र नातिव्याप्तिः तादृशजातिमद्भिन्नगुणत्वमेव सामान्यगुणानां लक्षणं सर्वमे
यमिति मूलोक्तं सर्वसंग्राहकं न भवतीत्याह वक्ष्यत इति नित्यमितीति अत्र नित्यत्वं
प्रागभावाप्रतियोगित्वं ध्वंसाप्रतियोगित्वं वा एकतरनिवेशेनापि संयोगादेर्वा
रणात् एकपदं स्वरूपकथनमिति द्रष्टव्यम् मूले व्यावर्तका इति नित्यद्रव्याणां
परस्परभेदसाधका इत्यर्थः अथ विशेषपदार्थे किं प्रमाणं न चान्यतसंकौ

यद्रूपावच्छिन्ने
त्यादिर्भिन्नः ८=

व्यावर्तकधर्मशून्यानाम् १ = सजातीयानाम् २ =

एकत्वादिव्यक्तेरेव भेदकत्वसंभवादिति चेन्न यतः
एतत्परमाणोस्तत्परमाणुभेदसाधने १५ त्रुटि ॥

णांनां परमाणूनां भेदकधर्मं विना भेदासिद्धेरतः विशेषोऽङ्गीकर्तव्य इति वाच्यम् एक
त्वादेर्व्यभिचारितया एतदेकत्वादेरेव हेतुता वाच्या न च तयोः परमाण्वोर्भेदासिद्धा
वेकत्वादावेतत्त्वं दुर्ग्रहं एतत्परमाणुसमवेतत्वे हि तत्सैतत्त्वे तस्मात्त्वमिति नित्यद्र॰ एकत्वस्य ३ =
व्यमेष्वव्योर्विशेषपदार्थः स एव च सजातीयानां परस्परं भेदसाधक इति तत्रापि॰
व्यावर्तकान्तर ४ = विशेषान्तरापेक्षा नास्ति अतो नानवस्थेति संप्रदायः वैशेषिकमतसाधारण्ये॰
न समवायेऽनुमानं प्रमाणयति नील इति समवायिकारणत्वस्यौत्यावयवि॰
निसत्त्वाद्द्रव्येति परमाणुवारणाय जन्येति अविनश्यदवस्थसंबन्धापराश्रित
संवतिष्ठते विनश्यदवस्थत्वं नाश्रितं क्षणं संवतिष्ठते यथा तत्त्वादिनाशेऽप॰

घटे रूपादिसमवायिसत्त्वात् तत्राव्याप्तिवारणाय द्रव्येति ३ =

ध्वंसप्रागभावयोः प्रतियोगितावच्छेदकसंबंधानंगीकारे २=

दादिरिति मनसिकृत्य भूतलेऽविनष्यदित्युक्तं प्रागभावे प्रमाणमाह भविष्यतीति संस।

र्गेति तादात्म्यातिरिक्तसंसर्गेत्यर्थः ध्वंसप्रागभावयोः प्रतियोगितावच्छेदकसंबंधो।

प्राचीनमताभिप्रायेण ३= वर्त्तते इति मताभिप्रायेण त्रैकालिकेति विशेषणमन्यथाऽन्योन्याभाववारकेणो

त्रैकालिकेतिपद ४= वतयोर्वारणेन तद्व्यर्थतापत्तेः प्रदिसंसर्गावच्छिन्नेत्यादेरन्योन्याभावभिन्नाऽभाव।

नवीनमते ५= इत्यर्थः तदा त्रैकालिकेति सिद्धान्तेपि सार्थके त्रैकालिकत्वमिह नित्यत्वरूपं । प्रागभावप्रतियोगित्वं ध्वंसप्रतियोगित्वरूपं वा ५=

भूतले भूतले घटो नास्तीति अत्र घटाभावो विशेषो भूतलस्य विशेष्यत्वं संबंधः ।

घटाभाववद्भूतलमित्यत्र तु भूतलांशेऽभावस्य विशेषणत्वं संसर्ग इति वदतां

प्राचामभिप्रायः विशेष्यत्वविशेषणत्वे स्वरूपसंबंधविशेषौ न ज्ञानीयवि

षयताविशेषौ न च विशेषणताख्यः स्वरूपसंबंध एक एवास्तु भूतले घटो

नास्तीतिप्रतीतौ भूतले घटाभाववदिति प्रतीतितो वैलक्षण्यस्य विशेष्यत्वावच्छि
न्नाधेयताविषयत्वकल्पनेनैव निर्वाहादिति वाच्यं तादृशप्रतीत्योर्वैलक्षण्याय
प्रथमायां विशेष्यतावच्छिन्नाधेयता द्वितीयायां विशेषणतासंसर्ग इत्युपेय
ते किंवा प्रथमायां विशेष्यतासंसर्गः द्वितीयायां विशेषणतावच्छिन्नाधारते
त्यत्र विनिगमकस्य दुर्लभत्वात् नच तादृशप्रतीत्योस्संसर्गांशेऽविलक्षणत्वे
पि विशेष्यविशेषणभावभेदाद्वैलक्षण्योपपत्तिरित्युभयत्र विशेषणताया एव
संबंधतास्त्विति वाच्यम् तावतापि भूतले घटो नास्ति भूतलवान् घटाभाव इत्य
नयोः भूतले घटाभाववत् घटाभावे भूतलमित्यनयोश्च प्रतीत्योर्वैलक्षण्यानि
र्वाहात् तस्माद्विशेष्यत्वविशेषणत्वनामकयोरुभयोः स्वरूपसंबंधविशेष

न० टी०
प्र० ७६

योः संसर्गिता तथाच भूतलवान् घटाभाव इत्यत्र घटाभावांशे भूतलस्य विशेष्यत्वसंसर्गो घ
टाभावे भूतलमित्यत्र च भूतलांशे अभावस्य विशेष्यतासंसर्गो बाधित इति भ्रमत्वनिर्वा
ह इति संक्षेपः ध्वंसप्रागभावयोरिवैकप्रतियोगिकयोरत्यंताभावान्योन्याभावयोः कि
मेकविधत्वेनेत्याह प्रतियोगितेति आरोप्येति प्राचीनमताभिप्रायेण अत्र पर्यायो
गं प्रतियोगितावच्छेदक धर्मसंसर्गभेदोऽत्यंताभावबहुत्वप्रयोजकः प्रतियो
गितावच्छेदकधर्मभेदोऽन्योन्याभावबहुत्वप्रयोजक इति द्रष्टव्यं तदेव दर्शयति के
वलेति केवलदेवदत्ताभावाद्विशिष्टाभावः अतिरिक्त इत्यन्वयः अन्यथा केवलदे
वदत्तवति दंडी नास्तीति प्रत्ययानापत्तेः उभयाभावस्यातिरिक्तत्वे प्रतीतिं प्रमाण
यति एकसत्त्वेपीति घटपटौ न स्तः इत्यादौ घटत्वे पटत्वमुभयत्वं चैतत्त्रितयं प्रतियो
३

७६

76

गितावच्छेदकं केवलघटवति केवलपटवति यत्किंचिद्भूमयवतिचतथा प्रत्ययात्
संबंधभेदेनाऽभावस्याऽतिरिक्तत्वंदर्शयति संयोगेति सामान्यविशेषाऽभावयोर्भे
देदर्शयति तत्तद्विति अतिरिक्तइति अन्यथा यत्किंचिद्घटवतिघटोनास्तीतिप्र
त्ययाऽपत्तेः एवमन्योन्याऽभावेऽपीति अवच्छेदकभेदाच्च तत्तद्घटभेदः तत्तद्भूम
यभेदस्य अतिरिक्तइत्यर्थः प्रसंगाद्ऽऽाह घटत्वेति नाऽंगीक्रियतइति अभावधियो
विशिष्टवैशिष्ट्याऽवगाहित्वमर्यादोपपादयति तत्तथा घटत्वेनपटोनास्तीत्यादिप्रत्यया
स्यविशिष्टवैशिष्ट्यानवगाहिनो घटत्वादेः प्रतियोगितावच्छेदकत्वव्यवस्थापक
त्वाऽभावेन व्यधिकरणधर्मावच्छिन्नाऽभावेमानाऽभावादितिभावः ननु तर्हितादृ

घटभेद ५ ४
यथाघटोनास्तीतिबुद्धा
घटत्वविशिष्टस्यघटस्य
अभावांशेप्रतियो
गितांशेसंसर्गांशेच
योक्रियतेइतिभावः

प्रतियोग्यवृत्ति १ घटस्यघटत्वविशिष्टत्वाभावात् २

प्राचन्यपक्षस्य कागतिरित्यत आह पट इति ननु घटत्वेन पटो नास्तीति प्रतीतेः पटा-
धिकरणकघटत्वाभावावगाहित्वेन संभवति असति बाधके तच्छब्दोल्लेखि प्रती-
तेः तच्छब्दप्रतिपाद्यार्थविषयकत्वपरित्यागायोगात् पटाधिकरणकघट घटत्वम्॥
त्वाभावस्य च घटत्वेन पटो नास्तीति प्रत्ययात् कथमप्यप्रतीतेः किं त्ववच्छिन्न- त्वावच्छिन्नेत्यर्थः ४ =
अभावांशे शुद्धप्रतियोगितया घटस्यान्वयः ५ = प्रतियोगिताकत्वसंबंधेनाभावांशे स्वातंत्र्येण घटत्वावगाहित्वमेव अभा- प्रतियोग्यविशेषणत्वेन प =
वबुद्धिर्विशिष्टवैशिष्ट्यावगाहिमर्यादां नातिशेत इति नियमस्तु न एवं च नोल्लंघते ३ =
व्यधिकरणधर्मावच्छिन्नाभावः सप्रमाण इति चेदस्तु तर्ह्यतिरिक्तत्वेनास्यै-
त्याहातिरिक्तत्वे स इति सः व्यधिकरणधर्मावच्छिन्नप्रतियोगिताकः के-

बलान्वयीति प्रतियोगितावच्छेदकावच्छिन्नप्रतियोगिरूपविरहादिति भावः विरोधि १=
ननु भूतलादौ घटसत्त्वदशायां न तदभावबुद्धिरन्यदा तु जायतेऽतस्सामयि
काभावोऽतिरिक्त एवाङ्गीकर्त्तव्य इति वदन्तं निराकर्तुमाह सामयिकेति प्रति
योगिविरहसमये प्रतीयमानोऽत्यन्ताभाव एव सामयिकाभावः न तूत्पन्नविना
शशाली अतिरिक्त इति समुदितोऽर्थः ननु एवं भूतले घटस्यानयनदशाया
अत्यन्ताभावः १= मपि तदभावस्य नित्यत्वेन सत्त्वात् प्रत्ययापत्तिरत आह घटाभाववतीति नि
यामकत्वमेव समुपपादयति घटवतीति तत्तत्कालावच्छिन्नभूतलादे। घटाभावादिबुद्धिकालावच्छिन्न २=
रेव घटाद्यभावसंसर्गितया घटकाले च तच्छून्यकालविशिष्टभूतलादि।

घटाभावादिबुद्धिशून्येत्यर्थः २=

रूपसंसर्गाभावेनतदानतदत्यंताभावबुद्धिरित्यपिद्रष्टव्यं नन्वऽभावोमास्त्वऽतिरिक्तः
पदार्थः यस्मिन्नधिकरणेघटोनास्तीत्यादिप्रत्ययस्तस्मिन्नधिकरणेघटाद्यभावत्वक
उक्तप्रतीतिः ल्पनेनैवतथाप्रतीतिनिर्वाहात् लृप्तधर्मिणिधर्मकल्पनायाअक्लृप्तधर्मिकल्प^
नातोलघीयस्त्वादितिगुरुमतमाशंक्यनिराचष्टे केवलेति यद्यप्येवंतेष्वधि^
करणेषुधर्मकल्पनातोऽतिरिक्तैकधर्मिकल्पनस्यैवलघीयस्त्वादत्रोक्तन्यायानव व
तारः किंचाभावस्याधिकरणस्वरूपत्वेजलादौविद्यमानस्यगंधाद्यभावस्यजला
दिरूपत्वादितरेंद्रियग्राह्यतापत्तिरित्यादिदूषणानिप्रस्फुरंति तथापि केवलाधि^
करणादेवेति तद्वचननिरासादेवतन्निवृत्तिसंभवे किमेतान्यपेक्षितानीत्या^

मीमांसक इ०   अमीमांसकमत इ०

ला एतदेव निराकरोति अभावोऽनंगीकार इति अतिरिक्ताऽभावोऽनंगीकार इत्यर्थः अथ
किमिदं कैवल्यं भूतलस्वरूपमिति चेत् घटवद्भूतलस्यापि तदभावस्वरूपत्वापत्त्या
तदानीमपि घटाऽभाववत्ताबुद्धिप्रसंगः घटाऽभाववत्त्वमिति चेत्सिद्धमतिरिक्ताऽभावे
नातः कैवल्यनिर्वचनमशक्यमित्याह कैवल्यस्येति नन्वभावस्यातिरिक्तत्वे तदभा
वोऽप्यतिरिक्तस्तस्याप्यभावस्तथैत्यनवस्थास्यादत आह अभावाभाव इति ध्वंसेत्या
दि ध्वंसप्रागभावः प्रतियोगिस्वरूपः तत्प्रागभावरूपश्च प्रागभावध्वंसस्तु प्रतियो
गिरूपस्तत्त्वं तत्स्वरूपश्चेत्यर्थो विशेषः तेन प्रतियोगिप्रागभावदशायामपि ध्वंसो भ
विष्यतीति प्रत्ययस्य प्रतियोगिध्वंसदशायामपि प्रागभावो नष्ट इत्यस्य चोपपत्तिः
तत्काले द्रव्यत्वं नास्तीति प्रत्ययो जायते द्रव्यत्वाभावाभाव इति न जायते ति वैषम्या

न० टी०
प्र० ७४

निर्वाहाय नास्तीति प्रत्यये दैशिकसंबंधावच्छिन्नाधेयत्वमाने परिकल्पनीय मियं
च घटाभावाभावादेर्घटादिरूपत्वेप्त्विह घटाभावो नास्तीति प्रत्ययस्य भ्रमत्वमेवस्या
त् भावस्य विशेषणतावि शेषणत्वानंगीकारादतः अभावाभावोऽतिरिक्तो न तु ।
भावस्वरूप इति नवीनमतं दर्शयति अभावेति तर्हि निवर्त्यतमित्यत आह नृतीयेति ।
परमकारुणिकेन मुनिना दुःखपंकमग्नजगदुद्दिधीर्षुणा प्रणीते प्रमाणप्रमेये
त्यादिसूत्रे तद्विरोधं परिहर्तुमाक्षिपति नन्विति प्रत्यक्षप्रमाणस्य द्रव्ये अनुमा ।
नादीनां च गुणे तर्भावस्य स्फुटत्वात् प्रमेयादीनां द्रव्यादिष्वंतर्भावमाह आ
त्मेत्यादिना आत्मशरीरेंद्रियाणां द्रव्ये अर्थस्य पृथिव्यादिरूपस्य द्रव्यादिषु बु ।
द्धे गुणे अंतरिंद्रियमनसो द्रव्ये अंतर्भावः एवमग्रेपि यथायथमंतर्भावोद्रष्ट

ज्ञः धर्माधर्माविति तैज्जनिकेत्यर्थः एतच्चस्फुटमाकरे रागः इच्छाविशेषः मरणमि
ति मरणानंतरभाविजननमित्यर्थः तथाचपदव्युत्पत्तिः प्रेत्यभूत्वाभावोजननमि
ति चरमप्राणशरीरसंयोगध्वंसोमरणं आद्यशरीरप्राणसंयोगोजननं मुक्ता
त्मसंयोगध्वंसवतोघटस्यमुक्तत्वापत्तिवारणाय दुःखध्वंसइति दुःखध्वंसवता
मस्मदादीनां मुक्तत्वापत्तिवारणाय कालीनेति अन्यदीयदुःखप्रागभावसमान
ध्वंस१ कालिकदुःखवैवतोमुक्तात्मनामसंमुक्तप्रसंगात् स्वसमानाधिकरणेति दुःखप्रागभाववि त४
स्य२ शेषणं नच समानाधिकरणदुःखासमाना कालीनेत्यनेनैवसुषुप्तिकालिकदुःख
ध्वंसस्याप्यंतिमदुःखलक्षणवृत्तेर्वारणात्प्रागभावेतिव्यर्थमितिवाच्यं यथासन्निवेशेवै
यर्थ्याभावादिति दिक् संशयस्यनिरूपितत्वात्प्रयोजनस्वरूपंदर्शयति प्रयोज

न० टी०
प्र० ८०

नमिति उभयसाधनवतीति परपक्षनिराकरणस्वपक्षसाधनवती इदंच वितंडा।
यामतिव्याप्तिवारणायेति ध्येयं स्वपक्षेति अत्रविजिगीषुकथेत्यनुवर्त्तते नानेति
एकेनसर्वपक्षः क्षिपत अन्येनचसमाधानमेवंक्रमेणनानाकर्तृकत्वेकाव्यसमह।
स्याविसेयं छलमिति यथानवकंबलोयंदेवदत्तइतिनवतात्पर्येणाभियुक्तस्यनव।
त्वसंख्याविशिष्टमर्थांतरंपरिकल्प्यकश्चिद्दूषयतिनास्यनवकंबलाःसंत्यतिदरि।
द्रत्वादित्यादि असदुत्तरमिति उत्तरस्यासत्वेतु स्वासाधकतासाधारणेनपरसाध स्वाभिमतसाधकता समानशीलेत्यर्थः ६

स्वानभिमतपराभिमत साधकतासाधकता। पा३ कतासाधकतयास्वव्याघातकत्वात् तथाच स्वव्याघातकमुत्तरंजातिरितिलक्षणंप
र्यवस्यति तद्वांतरभेदान्दर्शयति साधर्म्येत्यादिना द्वंद्वांतेश्रूयमाणस्यसमा
शब्दस्यप्रत्येकंयोगः साधर्म्यसमा वैधर्म्यसमेत्यादयः चतुर्विंशतिजातयः ४।

साधर्म्यसंस्थापनाहेतुदूषकमुत्तरं साधर्म्यसमा यथा आत्मा सक्रियः क्रियाहेतु
गुणवत्वात् लोष्टवत् क्रियाहेतुगुणश्चात्र क्रियाजनकवायुसंयोगादिरेवेति
स्थापनायामुत्तरं यदि सक्रियसाधर्म्यात्सक्रियः तदा विभुत्वरूपनिष्क्रियसाधर्म्या
न्निष्क्रियएव किं न स्यात् न चात्र किंचिद्विनिगमकमस्तीति वैधर्म्येणदूषकमुत्तरं वै
धर्म्यसमा यथा तत्रैव क्रियावतो लोष्टस्य साधर्म्यात् द्यादिक्रियावानात्मा तदा विभु
त्वरूपतद्वैधर्म्यान्निष्क्रियएव किं न स्यात् नहि तत्साधर्म्यात् क्रियावता भवितव्यं
तद्वैधर्म्यान्निष्क्रियेण न भवितव्यमित्यत्र किंचिन्नियामकमस्तीति परोक्तसाधनादेव तद्
व्यापकधर्मस्यपक्षेआपादनमुत्कर्षसमा यथा शब्दोऽनित्यः कृतकत्वात् घटवत् इत्या
दौ कश्चिदेवमाह यदि कृतकत्वेन हेतुना शब्दो घटवदनित्यः स्यात्तर्हि तेनैव हेतुना

न० टी०
प्र० ८१

शब्दो घटवत्सावयवः स्यादिति ३ परोक्तदृष्टान्तसाधर्म्येण पक्षे परानभिमतधर्मान्तरस्या ।
भावसाधनमपकर्षसमा । यथा तस्मिन्नेवानुमाने यदि कृतकत्वेन शब्दो घटवदनि ।
त्यः स्यात्तर्हि तेनैव शब्दो घटवदश्रावणः स्यादिति ४ वर्ण्यस्य स्थापनीयस्य दृष्टान्तधर्म
स्य पक्षे साधनं वर्ण्यसमा । यथा पूर्वोक्तानुमाने क्रियाजनकनोदनाख्यसंयोगवत्त्वा ।
ल्लोष्टादेर्भवतु क्रियावत्त्वं आत्मनस्तु क्रियावत्त्वे तज्जनकनोदनाख्यसंयोगवत्त्व ।
मपि स्यादिति ५ साध्यहेत्वोर्धर्मयोरपि पक्षे तुल्यतासाधनमवर्ण्यसमा । यथा त ।
त्रैवानुमाने लोष्टादिगतनोदनादिरूपक्रियाहेतुगुणवत्त्वमात्मन्यसिद्धं तथा च ।
तुल्यतया यथाऽसिद्धेन क्रियाहेतुगुणेनात्मनि क्रियावत्त्वं साध्यते तथा तादृशेन
क्रियावत्त्वेन तज्जनकगुणवत्त्वमपि किमिति न साध्यते नियामकाभावादिति

६ दृष्टांतविकल्पं प्रदर्श्य दार्ष्टांतिकविकल्पकथनं विकल्पसमा यथा तत्रैवानुमा
ने क्रियाहेतुगुणयुक्तं किंचिद्गुरु यथा लोष्टादि किंचिल्लघु यथा वायुः एवं क्रि-
याहेतुगुणयुक्तं किंचित् क्रियावत् स्यात् यथा लोष्टादि किंचिदक्रियं स्यात् यथा
आत्मा पूर्वविकल्पो भवत्वयं तु न भवतीत्यत्र किं नियामकं स्यादिति ७ दृष्टांत-
स्य पक्षतुल्यताकथनं साध्यसमा साध्यपदाद्धोऽत्र पक्षवाची यथा तत्रैव यदि
यथा लोष्टस्तथा आत्मेति त्वयोच्यते तदा यथा आत्मा तथा लोष्ट इत्यप्यायाते-
तथा च यथात्मनि क्रियावत्त्वं साध्यते तर्हि लोष्टेपि तत्साधनीयं नेति चेत्तर्हि-
यथा लोष्टस्तथा आत्मेति न वाच्यं लोष्टसदृश आत्मा आत्मसदृशो लोष्टेन
इत्यत्र नियामकाभावादिति ८ प्राप्याप्रत्यवस्थानं प्राप्तिसमा प्राप्तिश्च सा-

ध्यहेत्वोः सामानाधिकरण्यं यथा तत्रैवानुमाने क्रियाव[illegible]हेतुगुणवत्त्वेनैव किमिति क्रि-
यावत्त्वे साध्यते किमिति क्रियावत्त्वेन तादृशगुणवत्त्वेन उभयोरविशेषादिति ९।
अप्राप्त्या प्रत्यवस्थानमप्राप्तिसमा यथा तत्रैव पूर्वोक्तदोषादप्राप्तस्य हेतोः साध्य-
साधकत्वे वाच्ये तथा चाप्राप्तत्वाविशेषात् सर्वः सर्वं साधयेदिति अयमेव हेतुः-
साध्याभावे किमिति न साधयेदित्यत्र विनिगमकाभावादिति १० साधनपरंप-
राप्रसङ्गः प्रसङ्गसमा यथा क्रियावत्त्वे क्रियाहेतुगुणवत्त्वं साधनं तत्र किं साध-
नं नहि साधनं विना कस्यचित्सिद्धिरस्ति एवं तत्रापि किं साधनमित्यादि ११।
दृष्टान्तेतरेण साध्याभावसाधनं प्रतिदृष्टान्तसमा यथा तत्रैव लोष्टदृष्टान्ते-
न क्रियावत्त्वे साधिते निष्क्रियाकाशदृष्टान्तेन आत्मनो निष्क्रियत्वमेव किं न-

स्यात् लोष्टदृष्टांतेन क्रियावत्त्वमाकाशादृष्टांतेन निष्क्रियत्वं नेत्यत्र नियामकाभा
वादिति १२ अनुत्पत्त्याप्रत्यवस्थानमनुत्पत्तिसमा यथा घटो न नित्यः जन्यैकत्वा
दित्यादौ कश्चिदाह यदि जन्यैकत्वमनित्यत्वे प्रमाणं तदा घटे एकत्वोत्पत्तेः पूर्वंत
दभावान्नित्यत्वे नित्यत्वे तदाऽनुत्पन्नएवेति १३ साधारणधर्मप्रदर्शनेन संशयो
द्भावनं संशयसमा यथा शब्दोऽनित्यः कार्यत्वादित्यादौ शब्दस्यानित्येन घटेन स
ह कार्यत्वरूपं साधर्म्यं यथास्ति तथा नित्येन शब्दत्वेन सह श्रावणप्रत्यक्षविषय
त्वे साधर्म्यमस्तीति उभयसाधर्म्यदर्शनात्संशयः स्यात् एकपरिशेषे नियामा
काभावादिति १४ वाद्युक्तहेतोः साध्यविपरीतसाधकहेत्वंतरोद्भावनं प्रकरण
समा सत्प्रतिपक्षोदाहरणमेवात्रोदाहरणं बोध्यम् १५ कालत्रयेऽपि हेतुत्वा

संभवेनाहेतुत्वकथनमहेतुसमा यथा कार्यत्वादिरूपसाधने साध्यादनित्यत्वात्पूर्वंका
लवृत्तित्वे तदानित्यत्वरूपसाध्यस्य तदानीमभावात्कस्य साधकं अथ पश्चात्काल
वृत्तित्वे तदा पूर्वकाले साधनाभावात् कस्य साध्यमनित्यत्वं यदि चोभयमेककालवृत्ति
किं कस्य साधनं किं कस्य साध्यं विनिगमकाभावादिति हेतुसमेति पाठे तु कालत्र
ये हेतुत्वस्यासंभवकथनं हेतुसमेत्यर्थः १६ अर्थापत्तिपुरस्कारेण साध्याभावो
द्भावनमर्थापत्तिसमा यथा पूर्वोक्तानुमाने शब्दस्यानित्यसाधर्म्यादनित्यत्वे यदि
तदाऽर्थापत्त्या सिद्धं नित्यसाधर्म्यान्नित्यत्वमपि एकतरावधारणे नियामकाभावा
दिति १७ सर्वाविशेषप्रसंगोद्भावनमविशेषसमा यथा तत्रैव यदि कृतकत्वा
दिनाऽनित्यघटादिसाधर्म्येण शब्दस्यानित्यत्वं स्यात् तदा प्रमेयत्वादिरूपेण

तत्साधर्म्येण सर्वस्यैवानित्यत्वं स्यात् मदुक्तसाधर्म्येण तत्सिध्यति ननु त्वदुक्तेनेत्य
त्वनियामकाभावादिति १८ उभयपक्षसाधर्म्येण साधनोपपत्तिकथनमुपपत्ति
समा यदि चानित्यत्वसाधने कार्यत्वमुपपद्यत इति शब्दस्यानित्यत्वे तदानित्य
त्वसाधनमपि किंचिदुपपद्यत इति नित्यत्वं किं न स्यादिति १९ वाद्युपदर्शितसा
धनाभावेपि साध्यस्योपलब्धिकथनमुपलब्धिसमा यथा शब्दोऽनित्यः प्रय
त्नानुविधायित्वात् घटवदित्यत्र प्रयत्नं विनापि वायुनोदनवशात् वृक्षशाखाभं
स्यशब्द ३। गजन्यस्योपलब्धेर्न प्रयत्नानुविधायित्वं शब्देऽस्तीति २० वादिनाऽनुपलब्धिवशा
त्कस्यचित्पदार्थस्यानंगीकारेऽनुपलब्धिवशादेव वाद्यभिमतस्यापि यत्किंचि
त्पदार्थस्याभावसाधनमनुपलब्धिसमा यथा जलादेर्विद्यमानस्याप्यावरण

त० टी०
प्र० ८४

वरणादनुपलब्धिः तद्वत् उच्चारणात्पूर्वं शब्दस्याविद्यमानस्याप्यावरणवशादनुपलब्धि
रित्येतन्मतं वादिना दूष्यते यद्यावरणवशाच्छब्दो नोपलभ्यते तदा जलाद्यावरण
मिव शब्दाद्यावरणमप्युपलभ्येतेति अत्रोत्तरं यदि भवद्भिरनुपलब्धित आवरणा
भावः साध्यते तदा अनुपलब्धेरप्यनुपलब्ध्याऽभावे सिद्धे तदभावादावरणाभावासि
द्धावावरणसिद्धिरिति २१ धर्मस्यानित्यत्वानित्यत्वविकल्पाद्धर्मिणो नित्यत्वसाधनं।
नित्यसमा यथा शब्दस्य यदनित्यत्वं भवद्भिरुच्यते तन्नित्यमनित्यं वा यदि नित्यं तदा
शब्दवृत्तेरेव तस्य सदातनत्वाच्छब्दस्यापि तथात्वमागतं अथानित्यं तदा शब्दे कदा।
चिदनित्यत्वाभावोस्तीति नित्य एव शब्द इत्युभयथापि शब्दस्य नित्यत्वमिति २२ अ
नित्यदृष्टान्तसाधर्म्यात्सर्वानित्यत्वप्रसंगोद्भावनमनित्यसमा यथा यद्यनित्येन।

घटेन शाब्दस्यापच्छन्नो ऽनित्य इत्युच्यते तदा येन केन चिद्धर्मेण सर्वस्यैव तत्सदृशत्वात्स

र्वस्यानित्यत्वप्रसंग इति २३ वाद्युक्तहेतोरन्यकार्येणापि संभवाभिधाने कार्यसमा ।

यथा तत्रैव प्रयत्नानुविधायित्वमुभयथापि संभवति घटादिवच्छब्दस्वरूपोत्पत्तौ ।

जलादिवदावरकनिवृत्तौ च उभयत्रापि प्रयत्नानुविधायित्वदर्शनात् तथा च तस्या ।

वरकनिवृत्तिरूपकार्ये तरस्य संभवान्नानित्यत्वनियतत्वमिति २४ क्वचित्कारण ।

समेति पाठः तस्यापि कारणस्य प्रयत्नानुविधायित्वस्योभयत्र शब्दस्योत्पत्तौ तदाव ।

रकनिवृत्तौ च समत्वाभिधानमितिरीत्या उक्त एवार्थः पर्यवसानमवसेयम् अत्र ग ।

यगौरवभयात्सकलप्रकारा न प्रदर्शिता अभियुक्तैरन्यत्र ते ऽनुसंधेया निग्रहस्था

ने लक्षयति वादिन इति २५ च यद्यपि छलादावव्याप्ति तथाप्यर्थान्तरादिरूपनि ।

नं० टी०
पृ० ८५

ग्रहस्थानमध्ये [illegible]वादिदोषः छलत्वादिनोपि ज्ञानस्योपयोगित्वात्तदुपादाने हेत्वा
भासवत् तस्यान्तर्भेदानदर्शयति प्रतिज्ञेत्यादिना तत्र प्रतिज्ञातार्थविरुद्धाभ्युपगमः
प्रतिज्ञातार्थपरित्यागो वा प्रतिज्ञाहानिः यथा शब्दोऽनित्यः प्रत्यक्षगुणत्वादित्यत्र सोयं
गकार इत्यादि प्रत्यभिज्ञाबलात्परेण बाधे उद्भाविते अस्तु तर्हि नित्यः शब्द इति नित्यत्वम
ङ्गीकुर्वन्वादी शब्दस्यानित्यत्वप्रतिज्ञां जहाति १ परोक्तदोषोद्दिधीर्षया पूर्वोक्तविशे
षणविशिष्टतया प्रतिज्ञातार्थकथनं प्रतिज्ञान्तरं यथा द्वित्यादिकं गुणजन्यं कार्यत्वा
दित्यत्राहष्टजन्यत्वेन सिद्धसाधनोद्भावने सविषयकेति गुणविशेषणादाने २ स्वो
क्तसाध्यविरुद्धहेतुकथनं प्रतिज्ञाविरोधः यथा द्रव्यं गुणभिन्नं रूपादितः पृथक्केना
नुपलभ्यत्वादिति ३ स्वोक्तेर्थे परेण दूषिते तदपलापः प्रतिज्ञासंन्यासः यथा श

ब्दोऽनित्य ऐंद्रियकत्वादित्युक्ते परेण सामान्ये व्यभिचारमुद्भाव्य दूषिते स्वोक्तमुपल-
पति केनोच्यते शब्दोऽनित्य इति ४ परोक्तदूषणोद्दिधीर्षया पूर्वोक्तहेतुकोटौ विशेषणो-
नरोपादाने हेत्वंतरं यथा शब्दोऽनित्यः प्रत्यक्षत्वादित्यत्र सामान्ये व्यभिचारो-
द्भावने जातिमत्वे सतीति विशेषणादाने ५ प्रकृतानुपयुक्तार्थकथनमर्थांतरं
यथानित्यः शब्दः अस्पर्शवत्वादिति हेतुः हेतुपदं च हिनोतेस्तुनि प्रत्यये निष्पन्नं प-
दं च सुप्तिङंतमित्यादि ६ अवाचकशब्दप्रयोगो निरर्थकं यथा शब्दोऽनित्यः जबग-
डदशत्वादित्यादि ७ परिषत्प्रतिवादिभ्यां बोधप्रयोजकपदप्रयोगः अविज्ञातार्थं
तच्च क्लिष्टान्वयमप्रसिद्धार्थकं त्वरितोच्चारितमित्यादिरूपं ८ परस्परानन्वितार्थ-
कपदसमूहोऽपार्थकं यथा शब्दे घटः पटः नित्यमनित्यं च प्रमेयत्वादित्यादि

अवयवानामनुक्रमेणाकथनमप्राप्तकालं यथा शब्दत्वाच्छब्दोऽनित्यमित्यादि १० य
त्किंचिदेकावयवशून्यावयवाभिधानं न्यूनं स्पष्टं ११ अधिकहेत्वादिकथनं अधिकं य
था शब्दोऽनित्यः शब्दत्वात् श्रावणत्वाच्चेत्यादि १२ अनुवादं विना कथितस्य पुनः कथनं
पुनरुक्तं यथा शब्दोऽनित्यः शब्दोऽनित्य इत्यादि १३ परिषदा त्रिरभिहितस्याप्यननुवादः
अननुभाषणं १४ परिषदाविज्ञातस्य वादिना त्रिरभिहितस्यापि वाक्यार्थबोधः अज्ञानं स्यां पः
१५ उत्तरार्हे परोक्ते बुद्धोपि उत्तरस्यास्फूर्त्तिवशात्तूष्णीभावः अप्रतिभा १६ असंभवत्कालो
त्तरककार्यव्यासंगमुद्भाव्य कथाविच्छेदो विक्षेपः १७ स्वपक्षे दोषमनुद्धृत्य परपक्षे दो
षाभिधानं मतानुज्ञा १८ उद्भावनार्हे परकीयनिग्रहस्थानानुद्भावनं पर्यनुयोज्यो
पेक्षणं १९ निग्रहस्थानरहिते निग्रहस्थानोद्भावनं निरनुयोज्यानुयोगः २०

एकसिद्धांतमतमाश्रित्यकथाप्रवृत्तौ तद्विरुद्धसिद्धांतमतमालंब्योत्तरदाने अपसिद्धां-
तः २१ प्रतिज्ञाहान्यननुभाषणाज्ञानाप्रतिभाविक्षेपपर्यनुयोज्योपेक्षणानां संभा-
वे अन्येषां हेत्वाभासव्यतिरिक्तनिग्रहस्थानानां गुणे हेत्वाभासानां च दुष्ट्यादिष्वंत-
र्भावो यथायथं बोध्यः अतिरिक्तः सूत्रार्थः सुगममित्यभिप्रायेणाह शेषमिति
नन्वनलसंयोगे सत्यपि मण्यादिसमवधाने दाहो न जायत इति मण्यादेः प्रतिबंध-
कता वाच्या सा च वह्नौ दाहानुकूलशक्तिस्वीकारेणैव निर्वहति प्रतिबंधकतायाः
कार्यानुकूलशक्तिविघटकत्वरूपत्वात् तस्मादन्यथानुपपत्तिसिद्धायाः शक्तेरतिरिक्त-
त्वात् सप्तैव पदार्था इत्यसंगतमिति प्राभाकरः शंकते नन्विति नन्वेवं शक्तिसि-

न० टी०
प्र० ८७

शक्तेः १८ तावत १८

ह्यावपि तस्या अतिरिक्तत्वाऽसिद्धिरिति चेन्न यतो न द्रव्यात्मिका शक्तिः गुणादिवृत्तित्वात्
अत एव न गुणकर्माऽन्यतररूपा न च सामान्याद्यन्यतमरूपा उत्पत्तिविनाशशालि
त्वात् एवं चातिरिक्तपदार्थत्वसिद्धिरिति ननु प्रतिबंधकत्वं न कार्यानुकूलशक्तिवि
घटकत्वं अपि तु कारणीभूताभावप्रतियोगित्वं तच्च मण्यभावस्य हेतुत्वादेवोपप
द्यते मणिसमवधानदशायां च तदभावरूपकारणांतराभावादेव दाहानुत्पत्तिसंभव
स्तथा चातिरिक्तशक्तिस्वीकारोऽनुचित इत्याशयेन समाधत्ते प्रतिबंधकाभावस्येति
ननु दाहोत्पादे च वह्निः शक्तः इति व्यवहारोऽन्यथानुपपत्त्या सेत्स्यत्यतिरिक्तशक्तिरित्याशं
क्य तस्याः कारणतारूपत्वेऽपि व्यवहारोपपत्तेर्नातिरिक्तशक्तिरित्याह कारणत्वं स्ये १८

(अग्न्यभावः — interlinear above line 5)

अनुमितिरूपकार्यविघ
टकेवाधज्ञानेऽव्याप्ति […] ॥

त्ति नन्वं मण्याद्यभावस्य हेतुत्वे मणिसमवधानदशायां सत्यप्युत्तेजके दाहो न स्या
त् मन्मते तु मण्याद्यपसारणदशायामिवोत्तेजकसमवधानदशायामपि वह्नेर्दा
हानुकूलशक्त्यन्तरोत्पत्तेरंगीकारेण न दोष इति चेन्न उत्तेजकाभावविशिष्टमण्या
द्यभावस्य कारणत्वांगीकारेण दोषाभावात् न चोत्तेजकानामननुगतत्वात् तदुत्तेज
काभावकूटविशिष्टमण्याद्यभावस्यैव कारणतायाः कल्पनीयतया गौरवमिति वा
च्यम् दाहानुकूलशक्तिं प्रत्येतादृशकारणतायास्तवाप्यावश्यकत्वात् अनंतश
क्तितत्प्रागभावध्वंसकल्पनेन महागौरवादिति संक्षेपः नन्वेवमपि कोऽस्यादे
रस्पृश्यवस्तुस्पर्शे सति न भोजनादिरूपकार्याहंता शक्तिमत्त्वोऽस्यादेरेव तदर्हत्वा
त् अस्पृश्यस्पर्शे सति शक्तेर्नाशात् भस्मसंयोगे पुनः शक्तेरुत्पादनात् तदर्हता
रणं च कोऽस्यादावाधेयशक्तिस्वीकार्या न च कोऽस्यादेर्भोजनादिके प्रत्यस्पृश्य

र्शस्यासंस्पृश्य ५

स्पर्शस्य प्रतिबंधकत्वकल्पनादेवोपपत्तौ न तदंगीकार इति वाच्यं प्रकृते चासंस्पृश्यस्य
संयोगरूपतया सति तन्नाशे प्रतिबंधकाभावसत्वात् कोस्यादावेतरा भस्मादिसंयोज
ने भोजनाद्यर्हतापत्तेरिति [illegible]दि पुनः प्रत्यवतिष्ठते ननु भस्मादिनेति प्रथमेनादिपदेना
स्नादिः द्वितीयादिपदेन ताम्रादेः परिग्रहः क्लृप्तध्वंसविशेषेणैव कोस्यादेः शुद्धत्वो
सं:५ पपत्तावतिरिक्तशक्त्यंगीकारोऽनुचित इति समाधत्ते भस्मादिसंयोगेति यत्र कोस्या
दौ भस्मादिसंयोगध्वंसानंतरं पुनरस्पृश्यस्पर्शस्तत्रापि भस्मादिसंयोगध्वंसस्य स
त्वदा:५ त्वापत्तिरतः सहितांतं ध्वंसविशेषणं साहित्यं चात्र संबंधविशेषनियंत्रितसामा
नाधिकरण्यं अस्पृश्यवस्तूनामनुगमकरूपस्य दुर्वचत्वेन तया सामान्यधर्मावच्छि न२
न्नाभावनिवेशासंभवात् यत्किंचिदस्पृश्यस्पर्शाभावस्य च तत्र सत्वात्तदापत्ति
स्तदवस्थैवेत्यतो यावदिति तथा च तत्र यावतां तत्तदस्पृश्यस्पर्शाभावानां निरव

च्छिन्नविशेषणतासंबंधेनासत्त्वान्नोक्तदोष इति भावः यत्र च भस्मादिसंयोगास्पृश्यवस्तु
संस्पर्शौ युगपदेवोत्पन्नौ विनष्टौ च तत्र तत्तदस्पृश्यस्पर्शाभावकूटसामानाधिकरण्य
विशिष्टभस्मादिसंयोगध्वंसमादाय शुद्धतापत्तिरतो भस्मादिसंयोगकालावच्छेदेन
तत्रविद्यमानानां तत्कालीनानां तत्तदभावविशेषाणां तथा च तत्र भस्मादिसंयोगक्षणावच्छे
देन यावदभावानामसत्त्वान्न दोष इति भावः चैत्रस्येदं धनमित्यादौ यत्स्वत्वं प्रतीयते त
त्पदार्थान्तरमिति मतं निरस्यति स्वत्वमपीति अपिनोक्तसमवायेन प्रतियोगि
त्वादिपरिग्रहः ननु तर्हि स्वत्वं किंस्वरूपमत आह यथेष्टेति तदवच्छेदकं चेति
प्रतियोगित्वं तादृशयोग्यत्वप्रयोजकं त्वित्यर्थः प्रतियोगिरूपं प्रतियोगितावच्छेदकरूपं वेत्या
२। दि बहुतरमूहनीयम् ॥ सर्वेषां पदार्थानामुक्तपदार्थैर्यथायथमन्तर्भावेन निरूप्य

स्खलन्सूनतां परिहर्तुं विधिं निरूपयिष्यमाणः शिष्यानामवधानाय तन्निरूपणं प्रतिजानी
ते अथेति स्वपरमतसाधारणं विधित्वं तावन्निर्वक्ति प्रयत्नेति प्रयत्नजनिका या चिकीर्षा
तज्जनकं यज्ज्ञानं तद्विषय इत्यर्थः गुरुमते कृतिसाध्यताज्ञानस्य स्वमते कृतिसाध्यत्व ^
विशिष्टेष्टसाधनताज्ञानस्य चिकीर्षाद्वारा प्रयत्नजनकत्वात् तन्मते च कृतिसाध्यत्वे ^
स्वमते च कृतिसाध्यत्वविशिष्टेष्टसाधनत्वे लक्षणसंगतिः अभिधायकस्य विधिमतामभि
प्रायेणाह तत्प्रतीति तादृशज्ञानविषयः कार्यत्वादिप्रतिपादकलिङादिरित्यर्थः लि ^
ङादीत्यादिना लोट्तव्यादिसंग्रहः वाकारो नाश्यायां गुरुमतमाशंकते कृत्यसाध्य इति ^
कृत्यसाध्यत्वेनावगत इत्यर्थः प्रवर्त्तकमिति चिकीर्षाद्वारा प्रवृत्तिजनकमित्यर्थः ^
नच कृत्यसाध्यत्वज्ञानाभावएव प्रवर्त्तकोस्त्विति शंक्यं कृत्यसाध्यत्वज्ञानाभावेन ^ त्वे

नन्वे गौरवात् कृतिसाध्यत्वाभावकृतिसाध्यभेदतत्तद्व्याप्यादिदर्शनान्नो प्रवृत्तौ प्रतिबंध
कत्वकल्पनेन महागौरवाच्चेति दिक् ननु विषभक्षणादौ प्रवृत्त्यापत्तिः कृतिसाध्यताज्ञा-
नस्य तत्रापि सत्त्वादित्याशंकां निराचष्टे नचेत्यादिना इष्टसाधनतालिंगकेति अयं
मत्कृतिसाध्यः मत्कृतिं विना अनुपपद्यमानत्वे सतीष्टसाधनत्वादित्यनुमानिकेत्य-
र्थः काम्यस्थल इति प्रवर्तकत्वादित्यनेनान्वयः ज्योतिष्टोमयागादावित्यर्थः विहितका-
लेत्यादि विहितकालशुचिजीवित्वज्ञानाधीनस्य कृतिसाध्यताज्ञानस्य नित्ये संध्यावं-
दनादौ [illegible] शौचादिरूपनिमित्तज्ञानाधीनस्य तस्य नैमित्तिके स्नानादौ प्रवर्तकत्वादित्यर्थः
अहमेतत्कालिककृतिसाध्यसंध्यावंदनकः एतत्कालिकशुचिजीवित्वादित्येवं रीत्या
कृतिसाध्यत्वज्ञानस्य विहितकालशुचिजीवित्वादिज्ञानजन्यत्वमवसेयम् अनन्तु

स्यादिना ऽहमेतत्कालिककृतिसाध्यस्नानादिकः ॥
एतत्कालिकशौचादिरूपनिमित्तत्वादिः परिग्रहः ॥

अहिना नित्यमेमित
कस्थले साक्षादेव ∧
स्वविशेषणवत्ताप्र
तिसंधानजन्यकृति
साध्यज्ञानं बोध्यं ∧
काम्यस्थले तु स्ववि
षयसाधनत्वरूप
पां परयेति १३ = ॥

मइति प्रवृत्तिसामान्यप्रयोजकस्यैकस्याभावा दितिभावः स्वविशेषणवत्तेत्यादि स्वं
प्रवर्त्तमानः पुरुषस्तस्य विशेषणं तन्निष्ठो धर्मः कामनादिस्तद्वत्तायाः स्वविषयसाधन
त्वादिरूपस्य तत्संबंधस्य प्रतिसंधाने ज्ञाने तज्जन्यत्वस्येत्यर्थः लाघवेनेति कारण
तावच्छेदकलाघवेनेत्यर्थः तन्मते कारणतावच्छेदकस्यजन्यत्वादिघटितत्वाद्गौरव ∧
मितिभावः कृतिसाध्येष्टसाधनेतिति अत्र बलवदनिष्टाननुबंधित्वमप्येतन्मते वनी
यं तेन कृतिसाध्यत्वेन तृप्तिरूपेष्टसाधनत्वेन चावगते विषसंपृक्तभोजनादौ प्रवृत्त्या न ४५
पत्तिः विशिष्टज्ञानत्वावच्छिन्नस्य कारणत्वकथनेन तु प्राचांमतेनैनव्यमते कृति
साध्यत्वादिज्ञानानां पृथगेव दंडचक्रादिन्यायेन कारणत्वात् प्रयत्नेति प्रवृत्तावि
त्यर्थः प्रत्यवायेति प्रत्यवायस्य परिहारः प्रागभावस्तस्य च दुःखजनकाभावतया

न्या॰ तत्र तस्यैवेष्टत्वेन फलत्वमिति भावः ननु कथं तत्प्रागभावस्य फलत्वे तस्याऽजन्यत्वा ।
दिति वाच्यं यत्सत्त्वे यत्सत्त्वमिति व्यवहारलभ्यस्य स्वरूपसंबंधरूपस्य संध्यावंदन ।
न्या ३ प्रयोज्यस्य तत्र सत्त्वेन फलत्वसंभवादित्यवधेयं ननु लिङादेः कार्य एव शक्तिरि ।
ति गुरुमतमाशंकते नन्विति इच्छाविशेषरूपस्य यागस्याशुतरविनाशिनः स्व
र्गसाधनत्वेन भानेन संभवति अयोग्यत्वादित्यपूर्वरूप एव कार्ये शक्तिरंगी
कार्येत्याह यागस्येति आशुतरविनाशिनः तृतीयक्षणाद्वृत्तिध्वंसप्रतियोगिनः ।
स्थायि फलपर्यंतस्थायि अन्वयप्रकारं दर्शयति कार्यं कृतिसाध्यमिति यागे ।
कृतिसाध्यत्वं साक्षात् अपूर्वे तु यागद्वारेति बोध्यं कार्यबोधेति इदं मत्कृतिसाध्य
मिति ज्ञानवानित्यर्थः विध्यर्थमुख्यविशेष्यकं शाब्दबोधं दर्शयति तेनेति ।

ने० टी०
प० ५१

तद्धर्मावच्छिन्नविषयकशाब्दबोधं प्रति २ त्रुटिः १

कृतावित्यर्थः १=

स्वर्गकामस्य लिङर्थे कार्ये तदेकदेशे च यागस्यान्वयेनेत्यर्थः न्यायमते तु तत्र
कृतिसाध्यबलवदनिष्टाजनकेष्टसाधनतया यागानुकूलकृतिमान् स्वर्गका
म इति वाक्यार्थबोधः ननु अपूर्वस्य पूर्वमनुपस्थितत्वात् कथं तत्र शक्तिग्रह इति चे
मीमांसकानां मते ३४ दपूर्ववदेत्यभिज्ञाः तन्मते तु तद्धर्मावच्छिन्नविषयकशक्तिग्रहस्य तादृशोपस्थितेश्च
हेतुता न तु समानविषयकत्वेन हेतुहेतुमद्भावः एवं च कार्यत्वावच्छिन्ने यत्र कुत्र
चिच्छक्तिग्रहः योग्यताबलाच्चापूर्वरूपकार्यस्य शाब्दबोधे भाने नहि यागविषय
कमन्यत्कार्यं संभवतीति ननु नित्ये फलाभावात्कथं तत्रापूर्वबोधकतेत्याह
यावज्जीवमिति अपूर्वमेवेति कार्यत्वेनेत्यादि पक्षाऽपूर्वमित्यर्थः लौकिकस्थले फलाजनकापूर्वभ्रमः
ऽपूर्वमानासंभवादाह आरोग्येति क्रियाकार्यं इति धात्वर्थनिष्ठकार्यत्व इत्यर्थः

तथा चारोग्यकामिनि योज्यके भेषज
पानविषयककृतिसाध्यमारोग्यमिति

५१

लौकिकोऽलौकिकसाधारण्येन कार्यत्वादावेव लिङादेः शक्तिरंगीकार्येत्याशयेन समाध
ते यागस्येति अयोग्यत्वात् यागस्य स्वर्गसाधनत्वेन भानं न संभवतीत्युक्तदोषं नि
राचष्टे अयोग्यतेति अयोग्यताऽसंशयसत्वेपि तस्या विघटकत्वाद्बोधो भवत्येवेति भावः
वाक्यादिष्टसाधनत्वे यागेऽवगते तस्याऽशुतरविनाशिनो व्यापारं विना फलजनकत्वाऽसं
भवात्तन्निर्वाहायापूर्वं कल्प्यत इत्याह तन्निर्वाहार्थमिति ननु यागध्वंसस्यैव व्यापारत्वम त
स्तु किमपूर्वकल्पनेनेत्यत आह कीर्तनादिनेति आदिना कर्मनाशाजलस्पर्शात्करतो
याविलंघनात् गंडकीबाहुतरणाद्धर्मः क्षरति कीर्तनादित्यत्रोक्तकर्मनाशाजलस्पर्शा
दि परिग्रहः ध्वंसस्य व्यापारत्वे स्वर्गाधारापत्तिरित्यपि द्रष्टव्यं विभावनीयम् लोकव्युत्पा
दनीति लोकव्यवहारेत्यर्थः स च यो यत्र प्रवर्तते स कृतिसाध्यत्वेनेष्टसाधनत्वेन च तज्ज्ञा

न० टी०
प्र० १५२

नातीत्येवंरूपः केचित्तु यदिच्छया यत्नप्रवृत्तिस्तत्साधनमिति रूपो लोकव्यवहार इत्याहुः
नव्याः पुनः लोके पचेतेत्यादिलिङादिसमभिव्याहारस्थले क्रियायामेव कृतिसाध्यत्ववि
क ३४ शिष्टसाधनत्वबोध इति नियमबलादित्यर्थः सर्वत्रेति शेष इति व्याचख्युः आख्यातत्वे
नेति तच्च संकेतसंबंधेनाख्यातपदवत्त्वेति स्वटिक [illegible] मेव शक्यतावच्छेदकमिति न
व्याः यत्नार्थकत्वे कृतित्वावच्छिन्नवाचकत्वे किंकरोतीति कृतित्वावच्छिन्ने [illegible]
जिज्ञासितसंबंधबोधकं हि तत् प्रश्नवाक्ये उत्तरवाक्यस्य कृतित्वावच्छिन्ने पाकसंबंध
बोधकत्वमेव तन्निर्वर्तकत्वं नान्यथेति भावः ननु रथो गच्छतीत्यादावाख्यातस्य कृति
बोधकत्वासंभवात्तदनुरोधेन व्यापार एव शक्तिर्वक्तव्येत्यत आह रथो गच्छतीत्यादाविति
ति व्यापारेऽनुकूलत्वोत्कीर्तनेन तु तेन संबंधेन व्यापारे गमनस्यान्वयलाभाय नव्याः

पुनः गच्छतीत्याख्यातस्य जानातीत्यादाविवाश्रयत्वे निरूढलक्षणा न चाश्रयत्ता
संबंधेनैव प्रथमांतार्थे गमनादेरन्वयेननिर्वाहे आश्रयत्वेनिरूढलक्षणाकल्प
नेनिरर्थकमिति वाच्यं नामार्थयोरिव धात्वर्थनामार्थयोरभेदातिरिक्तसंबंधेना
तत्र तथान्वयासंभवात् न्वयस्याव्युत्पन्नत्वात् स्तोकं पचतीत्यादौ स्तोकादेर्धात्वर्थपाकेऽन्वयादभेदातिरि
क्तेतिध्येयम् वैयाकरणमते निराचष्टे देवदत्तइति नाख्यातार्थत्वमिति आख्यात
स्यकर्त्रादौशक्तिस्वीकारेऽनंतकृत्यादेः शक्यतावच्छेदकत्वमंगीकर्तव्यं कृत्यादौश
क्तिस्वीकारेतु कृतित्वादिःजातेःशक्यतावच्छेदकत्वाल्लाघवमितिभावः तद्धृतैक।
त्वादीनामेवेति आख्यातार्थत्वमिति पूर्वेणान्वयः आदिनाकृत्यादिपरिग्रहः
ननु तर्हि कर्तृकर्मणोः कथंलाभ इत्यत आह तयोरिति आक्षेपादेवेति परमते।

न स्वमतेन प्रथमांतपदेनैव तल्लाभः देवदत्तस्तंडुलं पचतीत्यत्र तंडुलकर्मकपाकानु
कूलकृतिमान्देवदत्त इत्यन्वयबोधः देवदत्तेन पच्यते तंडुल इत्यत्र तु देवदत्तसम
वेतकृतिजन्यपाककर्माभिन्नस्तंडुल इति शाब्दबोधः न च देवदत्तं पचतीत्यत्र तृतीया
यास्तादृशे च कर्मत्वे द्वितीयायाः तंडुलः पच्यत इत्यत्र च द्वितीया स्यात् तत्र कर्तृ
कर्मणोराख्यातेनानभिधानादिति वाच्यम् अनभिहिते कर्तृत्वे तृतीयायाः
तादृशे च कर्मत्वे द्वितीयायाः विधानेनादोषादिति ध्येयम् उपसर्गाणां वाचक
त्वमते निरस्यति प्रजयतीत्यादाविति ननु धातुनैव प्रकर्षादेर्बोधे प्रशब्दादेर्वै
यर्थ्यमत आह उपसर्गाणामिति द्योतकत्वे तात्पर्यग्राहकत्वे एतेनेतरनिपाता
नां वाचकत्वमिति सूचितं तथाहि एवकारस्यायोगव्यवच्छेदोर्थः शंखः पांडुर

एवेत्यादौ अन्ययोगव्यवच्छेदस्य पार्थएव धनुर्धर इत्यादौ वित्यादिकं बहुत्तरमू-
हनीयम् शेत्तावत्प्रवृत्तये सकलकामनाविषयमुक्तिप्रयोजनकत्तां ग्रंथस्य दर्शा-
यति पदार्थज्ञानस्येति पदार्थतत्वज्ञानस्येत्यर्थः अन्येषामवांतरप्रयोजनाना
मपि सद्भावादाह परमेति श्रुतेरयमर्थः अरेमुमुक्षणा आत्माद्रष्टव्यः मुमुक्षोरा
त्मदर्शनमिष्टसाधनमिति यावत् आत्मदर्शनोपायं दर्शयति श्रोतव्यइत्यादि ते-
नार्थक्रमेण शाब्दक्रमस्त्यक्तो भवति अग्निहोत्रं जुहोति यवागूं पचतीत्यादिवत्
असंभावनानिवृत्तेरिति अप्रामाण्यज्ञाननिवृत्तेरित्यर्थः युक्त्यनुसंधानेति अयं
भावः युक्तिभिरनुचिंतनं मननं तच्च आत्मनइतरभिन्नत्वेनानुमानं तच्च भेदप्र-
तियोगीतरज्ञानसाध्यं तदर्थं सकलपदार्थनिरूपणमिति मोक्षोपयोगित्वं

नं० टी०
पृ० ५४

विशादयति तदनन्तरमिति मननानन्तरमित्यर्थः श्रुतस्यार्थस्यनैरंतर्येणानुसंधान-
रूपनिदिध्यासनस्योपायमाह योगविधिनेति इंद्रियाणि विषयेभ्यः प्रत्याहृत्य म
इंद्रियेभ्यः मनः प्रत्याहृत्य साक्षात्कर्तव्ये वस्तुनि मनः प्रणिधानं योगः तदनंतरं-
निदिध्यासनानंतरं मिथ्याज्ञाननाशे वासनासहितमिथ्याज्ञाननाशे दोषः
रागादिः एवकारेण कर्मव्यवच्छेदः मिथ्याज्ञानेनेति श्रुत्यादौ रजस्तमसो विशेष
ज्ञानेनैव यथा निवर्तते तथा प्रकृते पीति भावः कैवल्यं लभते नर इत्यादिना-
क्षीयंते चास्य कर्माणि तस्मिन् दृष्टे परावरे इत्यादिश्रुतेः ज्ञानाग्निः सर्वकर्मा-
णि भस्मसात्कुरुत इत्यादिस्मृतेश्च संग्रहः ज्ञानद्वारैवेति अत्रायं क्रमः निष्का-
मनया भगवत्प्रीत्यर्थं कृतैः कर्मभिः दुरितक्षयरूपात्मकशुद्धिर्भवति ततो वि-

विषयेषु वैराग्यं ततः श्रवणादौ प्रवृत्तिः ततः श्रवणादिक्रमेण तत्वज्ञानोत्पत्तौ पूर्वो-
क्तमिथ्याज्ञाननाशादिक्रमेण मोक्षनिष्पत्तिः अधिकमस्मदीयाभिनवचिंता-
मणिव्याख्यायामनुसंधेयं तर्ककर्कशविचारचातुरीधुरीणैरिति कौ-
ण्डिण्यगोत्रसम्भूतो नीलकण्ठाख्यपण्डितः कृतिमार्पयद्
तस्मै चंद्रचूडाय मंगलम् १ इति श्रीमत्पाणोवंशपयः-
२१ पारावाराका चंद्रायमानपदवाक्यप्रमाणपाराव-
रीण श्रीरामभट्टतनूजश्रीनीलकंठभट्टविर-
चितः तर्कसंग्रहदीपिकाप्रकाशः स-

तर्कसंग्रह दीपिका ; नीलकण्ठ भट्ट रचिता
६५ पत्रक ॥ ल० अ० ८ पं० प्र० पृ०

ह० ल०